[शा]श्वतकोशः

THE

[ANEKĀ]RTHASAMUCHCHAYA

OF

ŚĀŚVATA

A lexicon of Sanskrit words

Edited with Introduction discussing the Date of Sasvata, Critical Notes, Glossary of Words and एकाक्षरकाण्डः of another Lexicon named नानार्थरत्नमाला

BY

Narayan Nathaji Kulkarni, B. A., LL. B.
Editor of तर्कभाषा, काव्यालंकारसूत्रवृत्तिः *&c.*

POONA
ORIENTAL BOOK AGENCY
1930

शाश्वतकोशः

THE

ANEKĀRTHASAMUCHCHAYA

OF

ŚĀŚVATA

A lexicon of Sanskrit words

Edited with Introduction discussing the Date of Sasvata, Critical Notes, Glossary of Words and एकाक्षरकाण्डः of another Lexicon named नानार्थरत्नमाला

BY

Narayan Nathaji Kulkarni, B. A., LL. B.
Editor of तर्कभाषा, काव्यालंकारसूत्रवृत्तिः *&c.*

Poona

ORIENTAL BOOK AGENCY

1929

CONTENTS.

PRINTERS

Text 1-40 pp. by Mr. **Saptarshi**, at the **Prabhakar Press, Poona.**
,, 41–110 pp. by Mr. **Thakar at the Sidheshwar Press Kholhapur.**
Introd. & Title by Mr. **Rajaguru** at the**Rajaguru & Co's. Poona.**

Published by Dr. **N. G. Sardesai** L. M. & S.
for the **Oriental Book Agency, Poona.**

INTRODUCTION.

"अनेकार्थसमुच्चय" of शाश्वत or "शाश्वतकोश," as it is generally known, was edited for the first time by Dr. Zachariæ, which was printed in 1882 and published in Berlin. A revised edition of it was brought out by the late Mr. K. G. Oak, in 1918. The present edition is an improvement on both these editions.

शाश्वतकोश is divided into six sections. In the first three sections the meanings of each word are given respectively in full, half and quarter verses. The fourth is a supplementary section of quarter verses and fifth and sixth deal with the indeclinables which are also arranged respectively in half and quarter verses. Except this division there is no other systematic arrangement in the कोश.

Unlike other कोशs, शाश्वतकोश moreover, is not a complete कोश but a खण्डकोश, the words being put together without any order like other कोशs, where words are generally arranged in the order of final consonents. No such order being adopted in this कोश, it goes very difficult to trace any word of which the meaning is to be ascertained. In the first edition the words of which different meanings are given in the verse were required to be searched after reading the whole verse and this task becomes the more difficult to the beginner when the word was either combined with another word under some Sandhi rule or was compounded with another word. I have in the present edition underlined the words whose different senses are given in the verses. So the reader at once catches the principal word in the verse and knows that the rest are its homonyms.

I have also taken precaution to give the number of senses of the word in numerical figures just after it, which is printed in the margin of the book just at the beginning or at the end of the verse in which its meanings are given. I am confident that these two new improvements would facilitate the understanding of the work better.

As regards the date of शाश्वत the late Mr. Oak has given conclusive proofs which I quote below in full :—

"As regards the age of शाश्वत, scholars are divided in opinion. Some assign him to the 12th century while others claim

for him a higher antiquity than that of the Amarakosa itself. क्षीरस्वामिन्'s commentary on the आमरकोश, which has been recently published, affords some clue to the age of this writer. Numerous quotations from शाश्वत's work given by क्षीरस्वामिन् enable us to ascertain the highest and the lowest limits within which शाश्वत can be placed. We have already given our reasons for assigning the अमरकोश to the fourth century (300--400); and since क्षीरस्वामिन् belongs to the 11th century, शाश्वत must be placed between the 5th and the 10th century. अमरकोश's priority to शाश्वत can be easily established from the following considerations—

(a) In commenting on क्रमादातिथ्यातिथेये अतिथ्यर्थेऽत्र साधुनि (Amara. II. 7. 33.) क्षीरस्वामिन् says- अतिथय इदमातिथ्यं, अतिथेर्ण्यः सू० अतिथौ साधु-आतिथेयं, पथ्यतिथीति (सू०) ढञ्। कात्यस्त्वाह–अविशेषं विपाश्चिद्धिरातिथ्यमभिधीयते। आतिथ्योऽतिथिरागन्तुरिति च माला, शाश्वतोऽत एवोभयमाह-आतिथ्यं स्यादतिथ्यर्थं आतिथ्यमतिथिं विदुः। In his remarks on काल्य (Amara I. 3. 2.) क्षीरस्वामिन् says-शाश्वतः कल्यमप्याह-कल्यं प्रभातं सज्जं च कल्यो नीरोगदक्षयोः। In his comments on सुषिर (Amara. I. 7. 1.) क्षीरस्वामिन् says-शाश्वतस्तु निरस्तावयवौ सुषिरसुषी मन्यते, यदाहुः-गर्ते गर्तान्विते वाद्यविशेषे सुषिरं त्रिषु. It is evident from these that in the opinion of क्षीरस्वामिन्, शाश्वत was posterior to Amarasimha.

(b) In the body of the कोश itself- अपिशब्देन साध्यन्ते पूर्वाचार्यानुसारतः।
विस्मृता ये प्रमादेन कथ्यन्ते तेऽधुना पुनः ॥ (v.145)

by the word पूर्वाचार्य, शाश्वत refers to Amarasimha. In the नानार्थवर्ग of अमरकोश, such passages as-जैवातृकः शशाङ्केऽपि, व्याघ्रेऽपि, पुण्डरीको ना, देवशिल्पन्यपि त्वष्टा, रूप्यं प्रशस्तरूपेऽपि, और्वानलेऽपि पातालम्, केशेऽपि वृजिनः, यवान्यमपि दूषकः, चक्रं राष्ट्रेऽपि, स्वर्णेऽपि रा:, इ० are very frequent, and शाश्वत imitates Amara, in verses 736-780. Again शाश्वत who is prolix, and not succinct like Amara, copies the latter here and there. He borrows not only passages but verses and half verses from the नानार्थवर्ग of अमरकोश thus-

मात्रं कार्त्स्न्येऽवधारणे (शाश्वत 61 and Amara. III. 3. 179)
योग्यभाजनयोः पात्रम् (शाश्वत 400 and Amara. III. 3. 180)
पश्चात्सादृश्ययोरनु (शाश्वत 799 and Amara. III. 3. 249)
परिधिर्यज्ञियतरोः शाखायामुपसूर्यके (शाश्वत 424 and A. III. 3. 97)
भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु (योनिषु) (शाश्वत 48, A. III. 3. 208)
योगः संनह(वन)नोपायसंगतिध्यानयुक्तिषु (शाश्वत 100, A. III. 3. 22.)
दिग्देशकाले पूर्वादौ प्रागुदक्प्रत्यगव्ययम् (शाश्वत 139 and A. III. 4. 28)

दाषोत्पादेतुबन्धः स्यात्प्रकृत्यादिविनश्वरे । मुल्याउयायिनि शिशौ प्रकृतस्यानुवर्तने ॥
(शाश्वत 65 and Amara. III. 3. 98-99)

This shows that Amarasimha was prior to शाश्वत.

We shall now proceed to show that शाश्वत was posterior to Chandragomin* and कालिदास, who belonged to the 5th century. In one of the opening stanzas—

दृष्टशिष्टप्रयोगोऽहं दृष्टव्याकरणत्रयः । अधीती सदुपाध्यायाल्लिङ्गशास्त्रेषु पञ्चसु ॥

शाश्वत says that he has studied three different grammars and five लिंगानुशासनs. One of the three grammars and one of the five लिंगानुशासनs, it may be inferred, must be that of Chandragomin. In the stanza-वीणादीनां गुणस्तन्त्री तन्त्री दहसिरा मता (v. 426) the word तन्त्री is given as ईबन्त like नदी which is sanctioned by Chandra's उणादिसूत्र (I. 90), while according to पाणिनि's उणादिसूत्र (III.446), the word should be तन्त्रीः (Nom. sing.), So the word विश्राम in verse 54 is correct according to Chandragomin's grammar and not according to पाणिनि's grammar,‡

कालिदास uses the form ललामन् in कन्याललामकमनीयमजस्य लिप्सोः (R. V. 64), This form is not given by Amarasimha in III. 3. 143. शाश्वत notices both the forms ललाम and ललामन् in verse 80. कालिदास uses the word भित्ति in निर्धौतदानामलगण्डभित्तिः (R. V. 43) in the sense of प्रदेश which शाश्वत gives in verse 653. The noun सारङ्ग is generally used by कालिदास in the sense of 'an antelope or deer' and rarely in the sense of a *Chataka* bird. शाश्वत gives these two senses only in सारङ्गवेणचातकौ. जन्यामवदत्कुमारी (R. VI. 30), is explained by शाश्वत thus-नवोढाया

---

* In the Introduction to the नामलिंगानुशासन of Amara with the comm. of क्षीरस्वामिन्, we have shown that Amarasimha was a Bauddha and preceded the Bauddha grammarian Chandragomin. An additional evidence of this fact is found in the verse—

खुरणाः स्यात्खुरणसः प्रज्ञुः प्रगतजानुकः ।
ऊर्ध्वज्ञुरूर्ध्वजानुः स्यात्संज्ञुः संहतजानुकः ॥ (Amara. II. 6. 47)

According to Chandragomin the forms प्रज्ञु, संज्ञु, ऊर्ध्वज्ञु, ought to be प्रज्ञ, संज्ञ, ऊर्ध्वज्ञ by the *Chandra Sutras* संप्राज्जानुनोज्ञः and ऊर्ध्वाद्वा (IV 4. 119-120). The forms प्रज्ञ, संज्ञ, ऊर्ध्वज्ञ, given by Amarasimha are correct according to the *Panini Sutras* प्रसंभ्यां जानुनोर्ज्ञु and ऊर्ध्वाद्विभाषा (V. 4. 129–130.)

‡ See *Notes* to Prof. Pathak's Meghaduta, 2nd Ed. p. 83.

ज्ञातिभूत्या जन्याः स्निग्धा वरस्य च (v. 58). From what is said above and from what शाश्वत says in one of the concluding verses (अभिधानानि विविच्य ज्ञात्वा निखिलानि सुकविकाव्यानि । कृत्वा गुरुमभियोगं कोशोयं शाश्वतेन कृतः) it will appear that he lived after Chandragomin and कालिदास *i. e.* after the fifth century.

As शाश्वत alludes to वराहमिहिर in the last verse (महाबलेन कविना वराहेण च धीमता । सह सम्यक्परामृश्य निर्मितोयं प्रयत्नतः ॥) we shall not be far wrong, if we assign him to the end of the 6th and the beginning of the 7th century. This opinion is further confirmed by the fact that the feminine form खलिना (v. 377), unknown to Amarasi*m*ha, actually appears in the लिंगानुशासन of शाकटायन who belongs to the 9th century. So also the senses of the words योग and क्षेम, viz. अपूर्वार्थसंप्राप्ति and लब्धार्थरक्षण, given by शाश्वत in stanzas 100 and 292, and not given by Amarasimha, are assigned to those words by शंकराचार्य who flourished in the 6th century, in his भाष्य on the भगवद्गीता (IX. 22.)

On a comparison of शाश्वत's अनेकार्थसमुच्चय with Durga's कोश quoted by क्षीरस्वामिन् in his commentary on the अमरकोष we find that Durga not only borrows very often from but sometimes, improves upon शाश्वत. Thus-कूपीटमुदरे जले (क्षीर-p. 194) is borrowed from शाश्वत 723 and उद्वास्थितः प्रतीहारे चरभेदे (क्षीर-p. 200) from शाश्वत 539, वर्षाख्या लोकयात्तुश्च (क्षीर-p, 221) is an instance of शाश्वत's (v. 191) imitation by Durga. ऋतमुञ्छशिले सत्ये शोभनेपि विवक्षितम् (क्षीर-p.200) is an improvement upon शाश्वत 633, as well as पाशो बन्धनशस्त्रयोः (क्षीर-p. 220) upon शाश्वत 140. Amarasi*m*ha gives कोप (पान्त), while शाश्वत gives कोष (शान्त). Durga copies Amara in all the senses but follows शाश्वत in giving the word as शान्त (see क्षीर,-p. 220) As क्षीरस्वामिन् in his commentary on the नानार्थवर्ग of Amarasi*m*ha gives the additional senses of शाश्वत, first after each word and quotes verses afterwards giving additional homonyms only from Durga, he considers शाश्वत to be prior to Durga. The latter may probably be a lexicographer of the 8th century."

नानार्थरत्नमाला.

Part of this कोश was printed as an appendix of the शाश्वतकोश (Oak's edition) under the name of रत्नकोश, from an incomplete Ms. in the possession of the late Mr. Oak. He could not procure another complete Ms. of it and hence it was printed under a misleading title रत्नकोश found in the Ms. referred to above. There are several Mss. of रत्नकोश in the Bhandarkar Oriental Research Institute Poona, but they deal with either Vedanta or Tarka.

While going through the Mss. of the monosyllabic lexicons in B. O. R. I. I came across one Ms. (No. 759 of 86–92) which exactly tallied with the above referred to रत्नकोश. It is also an imcomplete Ms. in itself as it neither gives the name of the author nor any introductory verses, though it gives meaning of all letters beginning with अ and ending with क्ष. Another Ms. of the same lexicon was found out, through the courtesy of Vyankat Shastri of Bhandarkar Institute of Poona, in Grantha characters under the name नानार्थरत्नमाला. It is a complete Ms. and gives introductory verses and the name of author also. I have taken up in the present edition, the name and the introductory verses as they are, without any alteration. It has in all six काण्डs, containing lexicons of one, two, three, and four words, one of miscellaneous words, and one containing all indeclinable words. The Ms. being in Grantha character I am at the mercy of the transcriber. The whole of it could not be got transcribed in time. Mr. Vyenkat Shastri, however, was kind enough to transcribe the first काण्ड i. e. monosyllabic section which was badly needed for this edition. As the correct name of the कोश (नानार्थरत्नमाला) has been found and its contents are similar to the कोश named नानार्थार्णवसंक्षेप of केशवस्वामिन् (often quoted as केशव by मल्लिनाथ and अरुणाचल), I tried through Dr. N. G. Sardesai, L. M. & S., to find out if there be any such कोश as नानार्थरत्नमाला in Devanagri in the Bhandarkar Institute. To my great joy and surprise there did exist this कोश with the same name (No. 115 of 1883–1). It contains all the काण्डs excepting first काण्ड printed in the *infra*. With the help of these two Mss. (Granth and Devanagari) I have every hope of bringing out a correct and a complete edition in the near future.

Author, his life and work.

The name of the author of this नानार्थरत्नमाला is इरुगदण्डेश which is told by the author himself in the third verse of the Introduction viz.

सोऽयं ग्रथ्नाति नानार्थरत्नमालां गुणोज्ज्वलाम् । श्रीमानिरुगदण्डेशो नात्यल्पां नातिविस्तराम् ॥

He also tells in the same introduction that this monosyllabic lexicon is not the only work written by him. He has also composed lexicons of two, three, and four words; one of miscellaneous words and one containing all indeclinables cf.

काण्डैश्चतुर्भिरेकद्वित्रिचतुर्वर्णवर्णितैः । संकीर्णाव्ययकाण्डाभ्यामिह षड्भिरनुक्रमात् ॥

This इरुगदण्डेश is known also as इरुगदण्डाधिनाथ, दण्डनाथ, दण्डेश or भास्कर. He seems to be learned for he writes of himself as सरस्वत्याविलासमुकुरायते। (Introduction to 2). The verses which he composed are also lucid, clear and have an uninterrupted flow. His Guru's name is सीतारामं cf. सीतारामगुरुं च नौमि मनसा विद्वत्सभाधुर्यरम् ।

Nothing more of him is known for the present except that he was the son of Chaicha, minister of Bukka II and was appointed as a general by King Harihara II of विजयनगरम् who flourished in the second half of the 14th century. (Forgotten Empire p. 48).

इरुग seems to be his surname and दण्डनाथ, दण्डेश, etc. seem to be his titles which mean general. Bhaskar seems to be his name. It is not quite impossible that, though he was a general, he corld compose lexicons, for in former times Kings and their Officers were learned and could write on diverse subjects. It may be even, that he might have got this work written by some one ascribed to his name like many Kings and Officers of former times. But nothing can be said with certainty at this stage for want of full and authentic information.

Some important points in settling the text.

I have taken the printed text in the first edition as the base and then compared the other two Mss. with it. I have spoken of the Ms. from the Bhandarkar Institute Poona, as B and Malayalam Ms. as M. When the version of the Mss. was found to be superior and giving a clearer sense than the original printed text, version of the Mss. was chosen as text in the place of original printed version. But where the orginal printed text was equally good and clear the version of the Ms. is given as a reading at the foot of the page. In this way there are nearly seven to eight places in the text where I have preferred the version of the Ms. to that of the original printed text. I shall cite one for example.

In the original printed text the meaning of the word 'ञ' were not given at all. In fact the word ञ could not be found and so

many senses of the word 'ज' were given. The meanings of 'ज' begin from the 26th verse in which meanings of जः are given; meanings of जा and जं will be found in the 27th verse. The first half of the 28th verse gives the meanings of जिः and the second half of the verse runs as follows:—ज्रूः स्त्री वाण्यां जशब्दस्तु पुमान् धातरि हिंसके ।

It will thus be seen that the meaning of जः are given again in the 28th verse although they had been previously treated in the 26th verse as stated above, which in my opinion seems redundant. The above referred to line runs as follows in the M. Ms.:—

ज्रुः स्त्री वाण्यां झशब्दस्तु पुमान् धातरि हिंसके ।

Thus it will be seen that M. Ms. reads झ for ज and this reading is preferable as there was no necessity of giving the meanings of ज again when they were already dealt with previously. And the lexicon would also remain so much incomplete if the word झ is altogether omitted from it. I have, therefore, replaced झ for ज in my text. I have in this way changed my text in seven to eight places but I have not changed a single word unless I had a support of either of the two Mss. for doing so.

In one place only, I have changed the serial order of the verses without any authority from either of the Mss. e. g.

स्वोऽस्त्री धने पुमाञ्ज्ञातौ त्रिष्वात्मीये स्वमात्मनि ॥७७॥
स्वरव्ययं च त्रिदिवं त्विट् कान्तिज्वालयोः स्त्रियाम् ।
वल्के लवंगवल्के त्वग् वाग्द्वारोपमयोः स्त्रियाम् ॥७८॥

(latter half of the 77th and 78th verse from my text). I think, however, that this change is quite essential for the following reasons:—

The above referred to verses were not in the original printed text. In fact the original printed text ends here abruptly as the further part of the Ms. from which it was printed, was torn and unintelligible. The B Ms. gives only later half of the 78th verse e. g. वल्के लवंगवल्के त्वग् वाग्द्वारोपमयोः स्त्रियाम् ।

and does not give the other two lines. M. Ms. only gives all the three lines. These three lines give meanings of the word स्व and स्वर्. Both B and M Mss. concur in giving these verses just after the meanings of त्विट् and before those of श.

If we read the whole of the lexicon the serial order of the vowels and consonents is nowhere broken. In this case only the

meanings of क्ष come before the meanings of श्, ष्, स्. It appears a little bit strange. The meanings of क्ष ought naturally to come after the meanings of श्, ष्, स्, as क्ष is a conjunct consonent beginning with स्. The meanings of ज्ञ, which is made up of ज् and ञ, are given after the meanings of ज्.

I have, therefore, changed the serial order of the verses for the reasons stated above, and placed these verses just after the meanings of स् and before those of ह्. This arrangement does not change the meaning but on the contrary serial order of the letters is kept intact.

I have also given in the margin the number of senses in numerical figures just after the word whose meanings are given in the verses and have also underlined those words in the verses.

The last and most pleasant work which is by no means a great task, that remains now is to offer hearty thanks to those who helped me in the work. The first and foremost person to whom I owe a debt of gratitude is Dr. N. G. Sardesai, L. M. & S, the enterprising Manager of the Oriental Book Agency, of Poona. This work would not have seen the light without his help and kind suggestions. I have, therefore, to offer hearty thanks to him. I have also to thank Mr. G. S. Sardesai of Kolhapur without whose aid the book would not have been brought out so quickly and correctly.

Buldana,

Dated 9th August, 1929.

N. N. K.

अथ

श्रीशाश्वतप्रणीतः

अनेकार्थसमुच्चयः

अथवा

शाश्वतकोशः

श्रीगणेशाय नमः । ॐ नमः सरस्वत्यै ।

पाकोत्तीर्णसुवर्णवर्णरुचिरच्छायं वसानोम्बरं
भास्वत्कौस्तुभकान्तिकर्बुरपरिभ्राजिष्णुवक्षःस्थलः ।
शङ्खं चक्रमसिं गदामवितरं बिभ्रच्चतुर्भिः करै-
रारूढो गरुडं नवीनजलदश्यामो हरिः पातु वः ॥ १ ॥
पूर्वाचार्यप्रसादेन विदित्वा शब्दविस्तरम् ।
क्रियते शाश्वतेनायमनेकार्थसमुच्चयः ॥ २ ॥
स्फुटार्थपदविन्यासैः शिशूनां प्रतिपत्तये ।
कृतोयं न प्रबुद्धानामतः क्षाम्यन्तु सूरयः ॥ ३ ॥
एष ज्ञानार्थमज्ञानां संतोषाय विजानताम् ।
श्रमो मम न तु ज्ञानलवगर्वितचेतसाम् ॥ ४ ॥
प्रसिद्धैरप्रसिद्धैश्च शब्दैरेष विनिर्मितः ।
प्रसिद्धैर्ग्रन्थितुं ग्रन्थमप्रसिद्धैश्च वेदितुम् ॥ ५ ॥
दृष्टशिष्टप्रयोगोऽहं दृष्टव्याकरणत्रयः ।
अधीती सदुपाध्यायाल्लिङ्गशास्त्रेषु पञ्चसु ॥ ६ ॥
अतः शब्दार्थलिङ्गेषु कर्तव्योऽत्र न संशयः ।
शब्दकोशेऽभियोगेन विद्वज्जननिरूपिते ॥ ७ ॥

शिव ३ शिवं भद्रं शिवः शंभुः शिवा गौरी शिवाभया । शिवा ४
शिवः कीलः शिवा क्रोष्टा भवेदामलकी शिवा ॥ १

बल ८ बलं शक्तिर्बलं सैन्यं बलं स्थौल्यं बलो बली ।
बलं रूपं बलो दैत्यो बलः काको हली बलः ॥ २

मधु ६ मधु मद्यं मधु क्षौद्रं मधु पुष्परसं विदुः ।
मधुर्दैत्यो मधुश्चैत्रो मधुकोपि मधुर्मतः ॥ ३

ध्रुव ६ ध्रुवः कीले (लो) ध्रुवं शश्वद् ध्रुवं तर्के ध्रुवो मुनौ । ध्रुवा १
ध्रुवो नित्ये निश्चिते च गीतिस्रुग्भेदयोर्ध्रुवा ॥ ४

शिखा ६ शिखा ज्वाला शिखा चूडा शिखा शाखा शिखा शिफा ।
शिखा शिखण्डिनां चूडा शिखा स्यादग्रमात्रकम् ॥ ५

घन ९ वाद्ये मुस्तेऽम्बुदे सान्द्रे घनः स्याल्लोहमुद्गरे ।
घनौ काठिन्यसंघातौ मूर्तिबाहुल्ययोर्घनः ॥ ६
(घनं सान्द्रं घनं वाद्यं घनो मुस्तो घनोऽम्बुदः ।
घनौ काठिन्यसंघातौ घनः स्याल्लोहमुद्गरः ॥)

राम ६ रामा स्त्री जामदग्न्यश्च रामो रामौ सितासितौ । रामा १
रामः पशुविशेषोपि रामौ चारुहलायुधौ ॥ ७

पद्म ५ पद्मा लक्ष्मीर्निधिः पद्मः पद्मानि गजबिन्दवः । पद्मा १
संख्यानागविशेषौ च पद्मौ पद्मं सरोरुहम् ॥ ८

वसु ६ देवप्रभेदा वसवो वसुः किरणयोक्त्रयोः ।
वसु रत्नं वसु धनं वसु तेजो निगद्यते ॥ ९
(वसुमाहुर्हुताशनम् ॥)

गोत्र ३ विश्वंभरा भवेद् गोत्रा गोत्रा गोनिकुर (रु) म्बकम् । गोत्रा २
नाम गोत्रं कुलं गोत्रं गोत्रश्च धरणीधरः ॥ १०

शुचि ६ शुचिरग्निः शुचिः शुक्रः शुद्धानुपहतौ शुची ।
उपधाशुद्धसचिव आषाढश्च शुचिर्मतः ॥ ११

अमृत ५ सुराणामन्नममृतममृतं स्याद्याचितम् ।
अमृतं यज्ञशेषोपि निर्वाणं वारि चामृतम् ॥ १२

निर्वाण ४ निर्वाणमस्तंगमनं निर्वाणं गजमज्जनम् ।
निर्वाणमपवर्गोपि निर्वाणं निर्वृतिं विदुः ॥ १३

पुण्डरीक ४ पुण्डरीकं सितच्छत्रं पुण्डरीकं सिताम्बुजम् ।
व्याघ्रोपि पुण्डरीकः स्यात्पुण्डरीकश्च दिग्गजः ॥ १४ ॥

पालि ५ चिह्नमाहुर्बुधाः पालिं पालिः पङ्क्तिप्रदेश(भेद) योः ।
कर्णस्य ललिता पालिः पालिरश्रिरपि स्मृता ॥ १५

बहुल ३ एला गावश्च बहुला बहुलाः कृत्तिका अपि । बहुला २
बहुलः कृष्णपक्षो(क्षे)ऽग्निर्बहुलो बहुलं शिति ॥ १६

चित्र ४ चित्रं तिलकमिच्छन्ति चित्रमालेख्यमद्भुतम् । चित्रा २
नक्षत्रं च सुभद्रा च चित्रा चित्रं च कर्बुरम् ॥ १७

बलि ५ बलिः पूजोपहारः स्याद्बलिर्दैत्यो बलिः करः ।
बलिर्जराश्लथं चर्म जठरावयवो बलिः ॥ १८

विनीत ४ अपनीतं विनीतं स्याद्विनीतो विजितेन्द्रियः ।
विदुर्विनीतं निभृतं विनयग्राहितेपि च ॥ १९

शुक्र ५ देवारातिगुरुः शुक्रः शुक्रौ मासहुताशनौ ।
शुक्रं देहवतां बीजं शुक्रमक्षिरुजं विदुः ॥ २०

गव्य ३ ज्या गव्यं गोहितं गव्यं गव्या गोनिकुर (रु) म्बकम् । गव्या २
रागद्रव्यं च गव्याख्यं गव्यं क्षीरादिकं गवाम् ॥ २१

संभव ३ संभवं मेलकं विद्यादुत्पत्तिरथ संभवः ।
आधारानतिरिक्तत्वमाधेयस्य च संभवः ॥ २२

मणि ४ अलिञ्जरं मणिं विद्यान्मेहनावयवो मणिः ।
रत्नं मणिरजानां च कण्ठदेशस्तनौ मणी ॥ २३

कल्य ४ कल्यं प्रभातं सज्जं च (सज्जितं) कल्यो नीरोगदक्षयोः । कल्या २
कल्याणी वाक्च कन्याख्या कल्या कादम्बरी मता ॥ २४

गुरु ६ गुरुर्महति विख्यातो दुर्वहा (र्जरा) लघुनोर्गुरु (रुः) ।
गुरुर्निषेकादिकरे पित्रादिसुरमन्त्रिणोः ॥ २५

अक्ष ७ अक्षो रथस्यावयवे पाशकेऽप्यक्षमिन्द्रिये ।
विभीतकेऽक्षः कर्षे च शकटव्यवहारयोः ॥ २६

वृत्त ७ वृत्तं दृढमधीतं च वृत्तं वृत्तिर्मतं तथा ।
चरित्रच्छन्दसोर्वृत्तं निस्तलातीतयोरपि ॥ २७

कृष्ण ५ वर्णः कृष्णो विदुः कृष्णां पिप्पलीं द्रौपदीमपि । कृष्णा २
कृष्णाख्याः शस्त्रकव्यासधनंजयजनार्दनाः ॥ २८

वार्त्त ४ निःसारारोग्ययोर्वार्त्तं नीरुग्वार्तोथ वृत्तिमान् । वार्त्ता ३
कृष्यादाविष्यते वार्त्ता वर्तनोदन्तयोरपि ॥ २९

क्षुद्र ४ अधमक्रूरयोः क्षुद्रः क्षुद्रोऽल्पः कृपणस्तथा । क्षुद्रा ३
क्षुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिका ॥ ३०

परिग्रह ५ परिग्रहः परिजने शपथे च परिग्रहः ।
परिग्रहः कलत्रे च मूलस्वीकारयोरपि ॥ ३१

मत्सर २ धनवन्तमदातारं पुरुषं मत्सरं विदुः ।
असोढा परसंपत्तेर्मात्सर्यमपि मत्सरः ॥ ३२

रस ८ शृङ्गारादौ विषे वीर्ये तिक्तादौ द्रवरागयोः । रसा १
पारदे देहधातौ च रसः स्यान्मेदिनी रसा ॥ ३३

वर्ण ९ वर्णो गुणाक्षरयशःशुक्लादिब्राह्मणादिषु ।
वर्णः स्तुतौ कुथायां च वर्णः स्याद्भेदरूपयोः ॥ ३४

तल ५ तलश्चपेटस्तालश्च स्वरूपानूर्ध्वयोस्तलम् ।
ज्याघातो ध्रियते येन प्रकोष्ठे तत्तलं मतम् ॥ ३५

करण ५ करणानि हृषीकाणि करणं साधनं विदुः ।
करणाख्या च विज्ञेया कायकायस्थकर्मसु ॥ ३६

पद ९ व्यवसाये परित्राणे पादतच्चिह्नयोरपि ।
वस्तुस्थानापदेशेषु पदं स्याद्वाक्यशब्दयोः ॥ ३७

प्रमाण ५ सम्यक्प्रवक्तृपुरुषे प्रमाणमथ कारणे ।
मर्यादायां प्रमाणाख्या प्रमाणं मानशास्त्रयोः ॥ ३८

वर ४ वरो जामातरि श्रेष्ठे देवतादेरभीप्सिते ।
मनागिष्टे वरं यच्च कश्चिदाह तदव्ययम् ॥ ३९

ताल ३ गीतकालक्रियामाने तालस्तालोथ पादपे ।
तालः करतलेङ्गुष्ठमध्यमाख्यामिते तथा ॥ ४०

तन्त्र ६ प्रधानौषधिसिद्धान्तास्तन्तुवायपरिच्छदौ ।
तन्त्राणि तन्त्रमेकं स्यादुभयार्थप्रयोजकम् ॥ ४१

समय ६ शपथाचारसिद्धान्तान्समयान्संप्रचक्षते
समयः स्यात्क्रियाकारे कालसंकेतयोरपि ॥ ४२

सत्त्व ९ व्यवसाये स्वभावे च पिशाचादौ गुणे बले ।
द्रव्यात्मभावयोः सत्त्वं सत्त्वं प्राणेषु जन्तुषु ॥ ४३

भग ११ ऐश्वर्यस्य प्रयत्नस्य धर्मवीर्ययशः श्रियाम् ।
ज्ञानवैराग्यसूर्याणामिच्छायोन्योर्भगश्श्रुतिः (भगः श्रुतिः) ॥ ४४

दाय ३ विभक्तव्यं पितृ [व्य] द्रव्यं दायमाहुर्मनीषिणः ।
यौतकादिधनं दायो दायो दानं च कथ्यते (ऽ नमुदाहृतम्)॥४५

अभिपन्न ४ अभिपन्नोपराद्धः स्यादभिपन्नो विपद्गतः ।
अभिपन्नमभिग्रस्तमभिपन्नमभिद्रुतम् ॥ ४६

प्लव ५ क्रमनिम्ने भुवो भागे भेकपक्षिप्रभेदयोः ।
प्लवं विदन्ति विद्वांसः प्लवनोडुपयोः प्लवः ॥ ४७

भाव १२ भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु (योनिषु) ।
क्रियालीलापदार्थेषु विभूतिबुधजन्तुषु ॥ ४८

धर्म ८ स्वभावन्याययागादियमाचारेषु सोमपे ।
प्रचक्षते धर्मशब्दमहिंसाग (सोप) मयोरपि ॥ ४९

वश ४ आयत्ततायामायत्ते प्रभुत्वे च वशं विदुः । वशा ४
वशाश्वतस्रो वन्ध्या गौः सुता नारी करेणुका ॥ ५०

कल १ कलनाकालशिल्पेषु वृद्धौ मूलधनस्य च । कला ५
इन्दोरंशे कला ध्यानेऽप्यव्यक्तमधुरे कलः ॥ ५१

काण्ड ८ र [स]होविटपवर्गेषु गर्ह्यपानीययोरपि ।
बाणावसरयोः काण्डं काण्डं नालमपि स्मृतम् ॥ ५२

अरिष्ट ७ तक्रे मरणचिह्ने चारिष्टं वृक्षे च फेनिले ।
सुरायां च शुभेपि स्यात्काके निम्बे च पुंस्ययम् ॥ ५३
(तक्रे मरणचिह्ने स्यादरिष्टमशुभे शुभे ।
अरिष्टः कथ्यते काके निम्बफेनिलवृक्षयोः ॥)

अवहार ३ द्यूतयुद्धादिविश्रामे (न्तौ) ग्राहाभिख्ये च यादसि ।
निमन्त्रणोपनेतव्यद्रव्ये स्यादवहारवाक् ॥ ५४

तुला ५ गृहाणां दारुबन्धाय पीठिकायां तुलां विदुः ।
तुला पलशते माने भाण्डसादृश्ययोरपि ॥ ५५

पर्वन् ४ दर्शप्रतिपदोः संधौ ग्रन्थिप्रस्तावयोरपि ।
पर्वशब्दं विजानीयाद्विषुवत्प्रभृतिष्वपि ॥ ५६

परिकर ५ प्रगाढगात्रिकाबन्धे पर्यङ्कपरिवारयोः ।
प्रयुज्यते परिकरः समहारम्भयोरपि ॥ ५७

जन्य ६ नवोढाया ज्ञातिभृत्या जन्याः स्निग्धा वरस्य च ।
जननीयजनित्रोश्च जन्यं निर्वादयुद्धयोः ॥ ५८

हृषित ४ जातहर्षे प्रतिहते विस्मिते च मनीषिभिः । हृष्ट ४
रोमाञ्चविषये हृष्टो हृषितश्च प्रयुज्यते ॥ ५९

चक्र ९ चक्रवाको मतश्चक्रश्चक्रं सेनारथाङ्गयोः ।
राष्ट्रे दम्भप्रभेदेपि चक्रं प्रहरणान्तरे ॥ ६०

मात्र २ परिच्छदाल्पमानेषु धने कर्णविभूषणे । मात्रा ६
अक्षरावयवे मात्रा मात्रं कार्त्स्न्येवधारणे ॥ ६१

आत्मन् ७ कलेवरे प्रयत्ने च स्वभावे परमात्मनि ।
स्वान्ते धृतौ मनीषायामात्मानं कवयो विदुः ॥ ६२

संगर ५ संगरः स्यात्क्रियाकारे विपत्तावपि संगरः ।
संगरः संश्रवे युद्धे संगरं तु शमीफलम् ॥ ६३

प्रसव ४ उत्पादः प्रसवो ज्ञेयः प्रसवो गर्भमोचनम् ।
पुष्पं फलं च वृक्षाणां प्रसवं परिचक्षते ॥ ६४

अनुबन्ध ४ दोषोत्पादेऽनुबन्धः स्यात्प्रकृत्यादेर्विनश्वरे ।
मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने ॥ ६५

प्रतिसर ५ आरक्षे मण्डने सूत्रे चमूकाटिनियोज्ययोः ।
पञ्चस्वर्थेषु शब्दज्ञा विदुः प्रतिसरध्वनिम् ॥ ६६

व्यसन ५ विपत्तावशुभे पापे पानस्त्री मृगयादिषु ।
दैवानिष्टफलेऽशक्तौ [ले सक्तौ] व्यसनं कवयो विदुः ॥ ६७

पण ८ ग्लहे माने श्वेतका (वराटा) नां मूल्ये कार्षापणे धने ।
द्यूतादौ कल्पिते चैव बद्धमुष्टौ भृतौ पणः ॥ ६८
(द्यूते विक्रय्यशाकादेर्बद्धमुष्टौ भृतौ पणः ॥)

भोग ७ पालनेऽभ्यवहारे च निर्वेशे च पणे स्त्रियाः (पणस्त्रियाः) ।
भोगः सुखे भुजंगानां(गस्य) शरीरफणयोरपि ॥ ६९

पक्ष ९ केशे पक्षः समूहार्थः पक्षः साध्यविरोधयोः ।
बले काले पतत्रे च रुचौ पार्श्वे विकल्पिते ॥ ७०
(बलकालपतत्रेषु सहायपरिपार्श्वयोः ॥)

क्षेत्रिय ४ अन्यदेहचिकित्स्यार्हे क्षेत्रियः क्षेत्रजे तृणे ।
असाध्यरोगे विज्ञेयः क्षेत्रियः पारदारिके ॥ ७१

प्रतिग्रह ५ प्रयुज्यते स्वीकारणे सैन्यपृष्ठे पतद्ग्रहे ।
द्विजेभ्यो विधिवद्देये तद्ग्रहे च प्रतिग्रहः ॥ ७२

शेष २ उपयुक्तादृतेऽदन्यच्छेषं शेषोऽथ नागराट् । शेषो १
प्रसादाज्जिननिर्माल्यदातिः शेषेति कीर्तिता ॥ ७३

प्रग्रह ६ प्रग्रहः स्यात्तुलासूत्रे बन्द्यां (न्द्यौ) नियमनेऽपि च ।
धाम्नि योक्त्रे च वृक्षे च सुवर्णहलिसाह्वये ॥ ७४

निष्क ६ अष्टाधिके हेमशते हेम्नि हेमपले तथा ।
उरोविभूषणे निष्कं कर्षदीनारयोरपि ॥ ७५

धातु ८ श्लेष्मादौ रसरक्तादिर्महाभूतानि तद्गुणाः ।
इन्द्रियाण्यश्मविकृतिर्धातवो भ्वादिरस्थि च ॥ ७६
(श्लेष्मादि रसरक्तादि महाभूतानि तद्गुणाः ।
इन्द्रियाण्यश्मविकृतिर्विशेषादस्थि धातवः ॥ ७७ ॥

अर्थ ७ अर्थोऽभिधेये शब्दानां धनकारणवस्तुषु ।
प्रयोजने निवृत्तौ च विषये च प्रयुज्यते ॥ ७८

पुष्कर ८ मतङ्गजस्य हस्ताग्रे व्योम्नि खड्गफलेऽम्बुजे ।
जलभेषजयोस्तीर्थे तूर्यवक्त्रे च पुष्करम् ॥ ७९

तीर्थ ९ अवतारे विदुस्तीर्थं पात्रोपाध्यायमन्त्रिषु ।
स्त्रीणां रजसि शास्त्रे च क्षेत्रोपायाध्वरेषु च ॥ ८०

ललाम } ललामन् } ९ प्रधानध्वजशृङ्गेषु पुण्ड्रवालधिलक्ष्मसु ।
भूषावाजिप्रभावेषु ललामं च ललाम च ॥ ८१

कूट ९ मायादम्भाद्रिशृङ्गेषु सीरावयवयन्त्रयोः ।

अर्योधनेऽनृते राशौ निश्चले कूट इष्यते ॥ ८१

रूप ८ ग्रन्थावृत्तौ पशौ शब्दे नाटकादिस्वभावयोः ।
रूपमाकारसौन्दर्ये नाणकश्लोकयोरपि ॥ ८२

क्रिया १० उपायारम्भशिक्षासु निष्कृतौ संप्रधारणे ।
चिकित्साकर्मपूजासु चेष्टाकरणयोः क्रिया ॥ ८३

गो १० गोशब्दः पशुभूम्यंशुवाग्दिगर्थः प्रयुज्यते ।
स्वर्गलोचनबाणाम्बुकुलिशार्थोपि दृश्यते ॥ ८४

साधन ९ निवृत्तौ दापने सिद्धौ गतावनुगमे धने ।
उपायमृतसंस्कारवधमेढ्रेषु साधनम् ॥ ८५

गुण १० शुल्वे मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये ।
त्यागशौर्यादिसत्त्वादिसंख्यादिषु गुणः स्मृतः ॥ ८६

हरि १३ इन्द्रचन्द्राश्ववातार्कशुकभेकयमाहिषु ।
कपौ सिंहे सुवर्णाभे वर्णे विष्णौ हरिं विदुः ॥ ८७

अन्तर १३ भेदावसरबाह्येषु मध्यावधिविनात्मसु ।
स्थानात्मीयान्यतादर्थ्यरन्ध्रान्तर्धिषु चान्तरम् ॥ ८८

कशिपु ३ भोजनाच्छादने सद्भिरुभे कशिपुरिष्यते ।
एकैकशोपि कशिपुं [पु] भोजनाच्छादने विदुः ॥ ८९

रोदसी } ३ द्यावापृथिव्योरेकत्र प्रयोगे रोदसीं विदुः ।
रोदस् } दिवि विश्वंभरायां च रोदसी रोदसा सह ॥ ९०

संसरण ३ आचक्षते संसरणं नगरस्योपनिर्गमे ।
संसारेपि रथादीनामसंबाधगतावपि ॥ ९१

इन्द्राणी ३ इन्द्राणी करणे स्त्रीणां रतिशिल्पकृतात्मनाम् ।
इन्द्राणी सिन्धुवारे च कलत्रे च शतक्रतोः ॥ ९२

कर्णिका ४ बीजकोशे सरोजस्य कर्णिका कर्णभूषणे ।
मता गजस्य हस्ताग्रे कर्णिकाङ्गुलिसंज्ञके ॥ ९३

विषय ५ प्रबन्धाद्यस्य यो ज्ञातः स तस्य विषयः स्मृतः ।
इन्द्रियार्थे जनपदे विषयो गोचरे पदे ॥ ९४

अग्र ५ अग्रं प्रधानमूर्ध्वं च पुरस्तादग्रमिष्यते ।
अग्रमभ्यधिके दृष्टं परिमाणे पलस्य च ॥ ९५

गात्र ३ गात्राणि विदुरङ्गेषु गात्रमुक्तं कलेवरे ।
अग्रजङ्घाविभागे च गजानां गात्रमिष्यते ॥ ९६

पौरुष ३ ऊर्ध्वविस्तृतदोःपाणिनृमाने पौरुषं विदुः ।
भावे कर्मणि विज्ञेयं पौरुषं पुरुषस्य च ॥ ९७

पौरुषेय ४ पुरुषेण कृते कार्ये पुरुषाणां कदम्बके ।
वधे विकारे पुंसश्च पौरुषेयपदं विदुः ॥ ९८

भाग्य ३ भवान्तरकृतं कर्म भाग्यमाहुः शुभात्मकम् ।
अशुभात्मकमप्याहुः केवलं च शुभाशुभम् ॥ ९९

योग ७ योगः संनह(वन)नोपायसंगतिध्यानयुक्तिषु ।
योगोऽपूर्वार्थसंप्राप्तौ योगो विश्रम्भघातिनि ॥ १००

गन्धर्व ५ अन्तराभवसत्त्वे स्याद् गन्धर्वः खेचरे हये ।
गन्धर्वः पशुभेदे च गन्धर्वं गायनं विदुः ॥ १०१

कुतप ४ कुतपो वाद्यविन्यासे दर्भकालप्रभेदयोः ।
छागरोममयं केचित्कम्बलं कुतपं विदुः ॥ १०२

काम ५ कामे(म्ये) निकामे कामाख्या कामश्च मदनेच्छयोः ।
यत्काममभ्यनुज्ञाने तदव्ययमुदाहृतम् ॥ १०३

पिप्पल ३ पिप्पलं सलिलं विद्यात्तरुजातिश्च पिप्पलः ।
वस्त्रच्छेदप्रभेदं च केचिदिच्छन्ति पिप्पलम् ॥ १०४

भोगिन् ३ वैयावृत्त्य(प्रत्य) करो भोगी भोगी राजभुजंगयोः । भोगिनी १
विहाय महिषीमन्या भोगिन्यो राजयोषितः ॥ १०५

निर्वेश ३ निर्वेश उपभोगः स्यान्निर्वेशः कर्मणो भृतिः ।
संमूर्च्छनं च केषांचिन्निर्वेश इति संमतम् ॥ १०६

कुण्ड ३ पतिवत्नीसुतो जारात्कुण्डः कुण्डमुखा मता ।
देवतादेर्जलाधारविशेषः कुण्डसंज्ञकः ॥ १०७

कौलीन ३ अवर्णवादः कौलीनं कौलीनं च कुलीनता ।
कौलीनं विविधं द्यूतं पक्षिभिः पशुभिस्तथा ॥ १०८

काकिणी ३ काकिणी मानदण्डः स्यात्तुरीयांशे पणस्य च ।
काकिणीं ब्रुवते केचिदेकमेव वराटकम् ॥ १०९

कौतुक २ पारंपर्योपदेशेन प्रख्याते मङ्गले किल ।
कौतूहले च शब्दज्ञाः कौतुकं संप्रचक्षते ॥ ११०

निकाय ३ एकार्थभाजि संघे च निवासे च निकायवाक् ।
असंहतपदार्थानामेकत्र करणेऽपि च ॥ १११

वनस्पति २ विना पुष्पं फलं यस्य वृक्षस्य स वनस्पतिः ।
प्रयुज्यते प्रयोगज्ञैर्वृक्षमात्रे वनस्पतिः ॥ ११२

ऐरावत २ ऋजुदीर्घं महेन्द्रस्य चापमैरावतं मतम् ।
तस्यैव हस्तिमल्लाख्यो गजोऽप्यैरावतो मतः ॥ ११३

संविद् ९ संभाषणे क्रियाकारे संकेते नाम्नि तोषणे ।
संविदाजौ प्रतिज्ञायामाचारज्ञानयोरपि ॥ ११४

कात्यायनी २ काषायवस्त्रविधवां द्वितीयवयसं स्त्रियम् ।
कात्यायनीं विदुः सन्त उमा कात्यायनी मता ॥ ११५

सरस्वत् २ सरिद्विशेषे सरिति वाचि प्रोक्ता सरस्वती । सरस्वती:३
सरस्वती गवि क्वापि सरस्वान्वारिधौ नदे ॥ ११६

यम ३ शरीरसाधनापेक्षं नित्यं कर्म यमो मतः ।
यमजश्च यमो ज्ञेयो यमो दक्षिणदिक्पतिः ॥ ११७

परिवेष २ परिवेषं विजानीयादुपसूर्यकमण्डलम् ।
परिवेष्टनमप्याहुः परिवेषं मनीषिणः ॥ ११८

शुद्धान्त २ शुद्धान्तसंज्ञं शब्दज्ञैराख्यातमवरोधनम् ।
कक्षान्तरं च भूपानामसर्वजनगोचरम् ॥ ११९

ऐरावती २ } २ ऐरावतीशतह्रदासौदामन्य इति त्रयम् ।
शतह्रदा २ } प्रयुज्यते कविवरैर्विद्युद्विद्युद्विशेषयोः ॥ १२० सौदामनी २

नीवी २ नीवीं ग्रन्थिं विदुर्नार्या जघनस्थस्य वाससः ।
धनं चोपचयाजीवैर्मूलं यस्य न हिंस्यते ॥ १२१

परिभाषण ३ परिभाषणमालापो नियमः परिभाषणम् ।
निन्दात्मक उपालम्भः परिभाषणमिष्यते ॥ १२२

अनूचान २ अनूचानं वदन्त्यार्या विनयावनतं नरम् ।
साङ्गे प्रवचनेऽधीती द्विजोऽनूचानसंज्ञकः ॥ १२३

अर्जुन ४ अर्जुनी सौरभेयी स्यादर्जुनं तृणशुक्लयोः । अर्जुनी १
अर्जुनो वृक्षभेदे च तथा मध्यमपाण्डवे ॥ १२४

स्थपति ३ बृहस्पतिसवेनेष्टं येनासौ स्थपतिर्मतः ।
प्रासादादिकरः शिल्पी स्थपतिः कञ्चुकी मतः ॥ १२५

दर्श २ अर्थज्ञैरिष्यते दर्शः पक्षान्ते वैदिको विधिः ।
दर्शः सूर्येन्दुसंपर्कादमावास्येति या स्मृता ॥ १२६

गृह्य ३ शाखापुरे विदुर्गृह्यं गृह्यमस्वैरिपक्षयोः । गृह्या १
गृह्यान्वदन्ति विद्वांसो गृहासक्तान्मृगाण्डजान् ॥ १२७

चिल्ल २ विज्ञेयं चक्षुषि क्लिन्ने चिल्लं पिल्लं च चुल्लवत् । पिल्ल २
चुल्ल २ क्लिन्नाक्षे प्राणिनि प्रोक्तौ चिल्लपिल्लौ सचुल्लकौ ॥ १२८

कक्ष ४ जन्तोरवयवे कक्षः कच्छवीरुत्तृणेषु च । कक्षा १
कक्षा स्यात्परिधानस्य पश्चादञ्चलपल्लवे ॥ १२९

दक्षिण ३ संभूतो दक्षिणस्यां यो दक्षिणः स उदाहृतः ।
परच्छन्दानुवर्ती च सरलोऽपि च दक्षिणः ॥ १३०

सैरन्ध्री २ सैरन्ध्री परवेश्मस्था स्ववशा शिल्पकारिका ।
वर्णसंकरजा या च सैरन्ध्री सा प्रकीर्तिता ॥ १३१

अरुण ४ अव्यक्तरागमरुणमरुणः सूर्यसारथिः ।
संध्यारागोऽरुणः कापि लोहितोऽरुण इष्यते ॥ १३२

रूप्य ३ आहतं हेमरजतं रूप्यमाहुर्मनीषिणः ।
प्रशस्तरूपको रूप्यो रूप्यं रजतमिष्यते ॥ १३३

गौर २ चामीकराभं शुक्लं च गौरमाहुर्मनीषिणः । गौरी २
असंजातरजाः कन्या गौरी गौरी च पार्वती ॥ १३४

क्ष्वेड २ क्ष्वेडो विषं ध्वनिः क्ष्वेडः क्ष्वेडा शल्यं च वैणवम् । क्ष्वेडा २
योधानां सिंहनादोऽपि रणे क्ष्वेडेति कीर्तितः (ता) ॥ १३५

उत्थान ५ उत्थानं गृहकार्यवन्ते स्यादुत्थानं च पौरुषे ।
उत्थानमुद्यमे तन्त्रे विद्यादुत्थानमुद्गमे ॥ १३६

स्थान २ अवकाशे स्थितौ स्थानं सम्प्रन्तमिदं पुनः । स्थाने २
युक्तार्थं कारणार्थं च शब्दतत्त्वविदां मतम् ॥ १३७

हृद्य ४ हृत्प्रियं हृद्भवं हृद्यं हृदयाय हितं च यत् ।
वशीकरणमन्त्रोऽपि वैदिको हृद्य इष्यते ॥ १३८

प्रा-च्-क्, ४ दिग्देशकाले पूर्वादौ प्रागुदक्प्रत्यगव्ययम् ।
उदच्-क्, ४ प्राच्योदीच्यप्रतीच्यानां वाचकं स्यादनव्ययम् ॥ १३९ प्रत्यच्-क्३

पाश ३ खगादिबन्धने पाशः समूहे केशपूर्वकः ।
कर्णपूर्वोऽपि शब्दोऽयं कर्णं वदति शोभनम् ॥ १४०

तार ३ मुक्ताशुद्धौ स्वनेऽत्युच्चे तारस्तारं च रूप्यके । तारा २
नक्षत्रे नेत्रमध्ये च तारा तारवदिष्यते ॥ १४१

अभीक्ष्ण २ पौनः पुन्यं सर्वदा च स्यादभीक्ष्णार्थकं द्वयम् ।
अनव्ययमयं शब्दः कथितो बहुदर्शिभिः ॥ १४२
धारा ३ अश्वानां गतयः पञ्च धारा धारा च संततिः ।
अग्रस्कन्धे च सैन्यस्य धारामाहुर्मनीषिणः ॥ १४३
कंस ४ स्यात्कंसस्तैजसे द्रव्ये पानपात्रे च कांस्यवत् । कांस्य २
दृष्टः कंसो विशेषेण दैत्यमानप्रभेदयोः ॥ १४४
प्रभव ३ स्याज्जन्महेतुः प्रभवः प्रभवो मूलमप्यपाम् ।
प्रभवं केचिदिच्छन्ति स्थानमाद्योपलब्धये ॥ १४५
विरोचन,३ हुताशने निशानाथे सहस्रकिरणे तथा ।
तमोपह, ३ तेमानुदा (दः) समौ दृष्टौ विरोचनतमोपहौ ॥ १४६ तमोनुद् ३
मध्यम ३ गीतस्वरे देहमध्ये मध्योद्भूते च मध्यमः । मध्यमा २
पाणेर्मध्याङ्गुलिर्दृष्टरजाः कन्या च मध्यमा ॥ १४७
प्रत्यय ७ प्रत्ययः प्रथितत्वे स्यात्प्रत्ययो ज्ञानवाचकः ।
प्रत्ययः शपथे रन्ध्रे (स्यादि-) विश्वासाधीनहेतुषु ॥ १४८
धर्मराज १ तथागते धर्मराजजिनबुद्धविनायकाः । बुद्ध १
जिन १ अन्तकेऽर्हति दोषज्ञे गजवक्त्रे क्रमादमी ॥ १४९ विनायक १
निस्तरण २ स्यादुपाये निस्तरणं द्वारं निःसरणं तथा । द्वार २
निःसरण २ तरणे द्वारि निर्याणे (र्वाणे) यथासंख्यमवस्थितम् ॥ १५०
ऋतु २ त्रयं स्त्रीरजसि ज्ञेयमृतुः कुसुममार्तवम् । कुसुम २
आर्तव २ शरदादिषु पुष्पे च ऋतूत्थे च विदुः क्रमात् ॥ १५१
(शरदादिषु पुष्पेषु ऋतूत्थेषु त्रिषु क्रमात् ॥)
अञ्जनः १ दिग्गजः कज्जलं माता मारुताङ्गभुवः कपेः । अञ्जना १
अञ्जनम् १ यथासंख्यं विनिर्दिष्टमञ्जनोऽञ्जनमञ्जना ॥ १५२
प्रकर १ प्रकरश्चोपकारश्च विकीर्णकुसुमादिषु । उपकार २
संहतौ चोपकृत्यां च यथासंख्यमवस्थितौ ॥ १५३

श्लोकेनैकेन निर्दिष्टं यथाशास्त्रमतः परम् ।
श्लोकस्यार्धेन वक्ष्यन्ते शब्दाः प्रव्यक्तया गिरा ॥ १५४

सूनृत २ प्रियं सत्यं च वचनं सूनृतं सुनृतं शिवम् ।
ब्रह्मन् ५ वेदोऽध्यात्मं तपो ब्रह्म ब्रह्माणौ विप्रवेधसौ ॥ १५५
पिनाक २ स्थाणोर्धनुः पिनाकं स्यात्पिनाकं शूलमात्रकम् ।
काली ३ मातृभेदे स्मृता काली भवानीनवमेघयोः ॥ १५६
दशमीस्थ २ स्थविरे नष्टबीजे च दशमीस्थं द्वयोर्विदुः ।
हेरम्ब २ हेरम्बो महिषः ख्यातो हेरम्बो विघ्ननायकः ॥ १५७
हंस ४ योगिभेदे खगे हंसो निर्लोभनृपसूर्ययोः ।
गण ४ गणः समूहे प्रमथे संख्यासैन्यप्रभेदयोः ॥ १५८
वृन्दारक ३ वृन्दारकं विदुर्देवे मनोज्ञश्रेष्ठयोरपि ।
अभिख्या ३ अभिख्या कीर्तिता कीर्तावभिख्या नामशोभयोः ॥ १५९
उत्तर ४ उदीच्यश्रेष्ठयोरूर्ध्वे वाग्भेदे विदुरुत्तरम् ।
ईश ईश ईश्वरवद् दृष्टः प्रभुचन्द्रार्धचूडयोः १६० ईश्वर २
चन्द्र २ उच्यते काञ्चनं चन्द्रं चन्द्रश्च मृगलाञ्छनः ।
पार्ष्णि २ पादग्रन्थेरधः पार्ष्णिः पार्ष्णिः स्याद्वाहिनीकटिः ॥ १६१
लक्ष्मी ३ शोभासंपत्तिपद्मासु लक्ष्मीः श्रीरिव दृश्यते । श्री ३
भव ५ प्राप्तिसंसारसत्तासु जन्मशंकरयोर्भवः ॥ १६२
उपनिषद् ३ धर्मे रहसि वेदान्ते बुधैरुपनिषन्मता ।
दृश् ४ लोचने दर्शने बुद्धौ दृग्दृष्टी दृक्च वीक्षके ॥ १६३ दृष्टि ३
संकुल २ इष्यते संकुलं व्याप्ते विश्लिष्टार्थवचस्यपि ।
अपवर्ग ३ क्रियावसानसाफल्ये मोक्षे त्यागेऽपवर्गवाक् ॥ १६४
लिङ्ग ३ सांख्योक्तप्रकृतौ लिङ्गं लिङ्गं स्याच्चिह्नशेफसोः ।
अभिशस्ति २ अभिशापप्रार्थनयोरभिशस्तिपदं विदुः ॥ १६५

कुमार ४ युवराजे शिशौ स्कन्दे कुमारोऽश्वानुचारके ।

सुमनस् ४ मालत्यां पण्डिते पुष्पे देवे च सुमनोऽभिधा ॥ १६६

प्रकृति ५ लिङ्गे स्वभावे प्रकृतिः पौरामात्यादियोनिषु ।

निसर्ग २ निर्माणे च स्वभावे च निसर्गः सृष्टिवन्मतः ॥ १६७ सृष्टि २

शंभु ३ शंभुरर्हन् पिनाकी च शंभुः कमलसंभवः ।

दर्शन ४ लोचने दर्शनं दृष्टं बुद्धिशास्त्रोपलब्धिषु ॥ १६८

कृतान्त ४ दैवे कृतान्तः सिद्धान्ते यमाकुशलकर्मणोः ।

दुरोदर ३ अयं दुरोदराभिख्यं द्यूतं द्यूतकरः पणः ॥ १६९

वृष ५ उक्तः श्रेष्ठाखुधर्मेषु वृषो गोबहुशुक्रयोः ।

तीक्ष्ण ५ विषात्मत्यागिनोस्तिग्म तीक्ष्णस्तीक्ष्णं रणायसोः ॥ १७०

रजत ३ इष्यते रजतः शुक्ले रजतं रूप्यहारयोः ।

पतङ्ग ४ शालिप्रभेदे शलभे पतङ्गः पक्षिसूर्ययोः ॥ १७१

नाग ४ काद्रवेयगजौ नागौ नागं सीसकरङ्गयोः ।

उदुम्बर २ उदुम्बरो वृक्षजातिर्देहली स्यादुदुम्बरः ॥ १७२

कलधौत २ रजतं कलधौतं स्यात्कलधौतं च काञ्चनम् ।

पर्जन्य २ सध्वानमेघः पर्जन्यः पर्जन्यो मेघवाहनः ॥ १७३

गोविन्द २ गोविन्दो भगवान् विष्णुर्गोविन्दोऽधिकृतो गवाम् ।

रोहित ३ ऋजुशक्रधनुर्मत्स्यौ रोहितौ रोहितोऽरुणः ॥ १७४

शक्ति ३ उत्साहादौ बले शक्तिः शक्तिं प्रहरणं विदुः ।

निष्ठा ५ निष्ठा निष्पत्तिनाशान्तयाञ्चानिर्वहणेषु च ॥ १७५

ऋषभ ३ गीतस्वरे बलीवर्दे श्रेष्ठे च ऋषभं विदुः ।

द्रविण, २ पराक्रमे च वित्ते च द्रविणं द्युम्नवन्मतम् ॥ १७६ द्युम्न २

रङ्ग ३ नृत्तयुद्धखले रागे रङ्गो रङ्गं त्रपु स्मृतम् ।

प्रवाल ३ प्रवालो वल्लकीदण्डे विद्रुमे नवपल्लवे ॥ १७७

दण्ड ४ दण्डो लगुडमन्थानदमसैन्येषु दृश्यते ।
कोण ३ वीणादिवादनोपाये कोणोऽस्रौ(श्रौ) लगुडे तथा ॥ १७८
निर्वृति २ निर्वृतिः स्यादस्तमये सुस्थतायां च निर्वृतिः ।
अनुभाव ३ अनुभावः प्रभावे स्यान्निश्चये भावसूचके ॥ १७९
ककुभ २ वीणाप्रसेवः ककुभः ककुभोऽर्जुनपादपः ।
वराटक २ बीजकोशे सरोजस्य कपर्दे च वराटकः ॥ १८०
अर्क ३ स्फटिके वृक्षभेदेऽर्कः स्यादर्को दिननायकः ।
कण्टक ३ रोमाञ्चे क्षुद्रशत्रौ च तरोरङ्गे च कण्टकः ॥ १८१
पाद ३ पादो भासि तुरीयांशे गिरेः प्रत्यन्तपर्वते ।
हिरण्य ४ मानभेदे धने हेम्नि हिरण्यं स्यादकुप्यके ॥ १८२
प्रधान ३ परमात्ममहामात्रमनीषासु प्रधानवाक् ।
कौशिक ४ गुग्गुलूलूकशक्राहितुण्डिकेषु च कौशिकः ॥ १८३
उग्र ३ उग्रः शूद्रासुते क्षत्रादुग्रावुत्कटशूलिनौ ।
अभिमान ४ गर्वविज्ञप्तिहिंसासु प्रणये चाभिमानवाक् ॥ १८४
सुषिर ३ गर्ते गर्तान्विते वाद्यविशेषे सु(शु)षिरं त्रिषु ।
(गर्ते गर्तान्विते वाद्ये सुषिरं त्रिषु दृश्यते ।)
समान ४ एकतुल्यशरीरस्थवायुसत्सु समानवाक् ॥ १८५
मुख ३ आदावुपाये च मुखं वदनं च मुखं विदुः ।
वर्ष्मन् ३ प्रमाणदेहयोर्वर्ष्म स्यादाकारे च सुन्दरे ॥ १८६
संभ्रम ३ त्रयं संभ्रममिच्छन्ति भयं संवेगमादरम् ।
स्व ४ स्वशब्दो वदति ज्ञातिमात्मात्मीयधनानि च ॥ १८७
द्रव्य ३ भव्यभेषजयोर्द्रव्यं द्रव्यं द्रविणमिष्यते ।
आतङ्क ३ शङ्कायामाहुरातङ्कं रोगसंतापयोरपि ॥ १८८

वाम ३ वामा स्त्री सुन्दरं वामं वामं सव्यप्रतीपयोः । वामा १

प्रग्राह २ हयरश्मौ तुलासूत्रे प्रग्राहः सद्भिरिष्यते ॥ १८९

प्रतिष्ठा २ आहतत्वे प्रतिष्ठा स्यात्प्रतिष्ठा स्थानमात्रके ।

प्रलय ३ प्रलयौ मृत्युसंवर्तौ मूर्च्छायां प्रलयं विदुः ॥ १९०

मान ३ मानं प्रमाणे प्रस्थादौ मानश्चित्तोन्नतावपि ।

वर्ष ३ लोकधातौ च वृष्टौ च वर्षं वर्षं च वत्सरे ॥ १९१

वारुणी २ वारुणीं मदिरामाहुः पश्चिमा दिक्च वारुणी ।

ज्योत्स्ना २ ज्योत्स्ना ज्योतिष्मती रात्रिर्ज्योत्स्ना चन्द्रमसः प्रभा ॥ १९२

दाक्षायणी २ दाक्षायणीं विदुर्दुर्गामश्विन्याद्याश्च तारकाः ।

व्यायाम २ परिश्रमार्थो व्यायामो व्यायामं पौरुषं विदुः ॥ १९३

आपन्न २ आपन्नं ब्रुवते प्राप्तमापन्नश्चापदि स्थितः ।

परिगत ३ विज्ञाते वेष्टिते प्राप्ते विदुः परिगतध्वनिम् ॥ १९४

धिषण १ धिषणस्त्रिदशाचार्यो धिषणा धीरपि स्मृता । धिषणा १

अनुमति २ ऊनेन्दुपूर्णिमानुज्ञे द्वे अप्यनुमती मते ॥ १९५

सौम्य ३ चारुचन्द्रजयोः सौम्यः सोमो यस्य च देवता ।

राका २ पूर्णेन्दुपूर्णिमा राका कन्या जातरजाश्च या ॥ १९६

सूचा २ व्यधनेभिनये सूचा सूचनात्प्रयुज्यते । सूचना २

तत, ३ वादित्रे विस्तृते व्याप्ते ततं विततवन्मतम् ॥ १९७ वितत ३

तिष्य २ ऋक्षे कलियुगे तिष्यः पुष्यवत्परिकीर्तितः । पुष्य २

चित्रभानु २ सूर्ये वह्नौ चित्रभानुर्विभावसुरिवेष्यते ॥ १९८ विभावसु २

क ५ कं वारिशिरसोः कश्च प्रजापत्यात्मवायुषु ।

धूमकेतु ३ उत्पाते ग्रहभेदे च धूमकेतुर्हुताशने ॥ १९९

(स्यादुत्पातो धूमकेतुर्धूमकेतुर्हुताशनः)

कीनाश ३ त्रयः कीनाशनामानः कदर्यः कर्षको यमः ।

पुण्य ३ मनोज्ञं सुकृतं धर्मश्चयं पुण्यमुदाहृतम् ॥ २००

शिखिन् ४ शिखी हुताशने वृक्षे शिखिनौ केकिकुक्कुटौ ।

कल्प ५ कल्पः शास्त्रे विधौ न्याये संवर्ते ब्रह्मणो दिने ॥ २०१

शमन २ इच्छन्ति वधमर्थज्ञाः शमनं शमनोऽन्तकः ।

उपक्रम ३ उपक्रमश्चिकित्सायामारम्भोपधयोरपि ॥ २०२

कम्बु ३ शम्बूक इष्यते कम्बुः कम्बुर्वलयशङ्खयोः ।

शङ्ख ३ निधिभेदः स्मृतः शङ्खः शङ्खं कम्बुललाटयोः ॥ २०३

ज्यायस् २ प्रशस्यवृद्धतरयोर्ज्यायाञ्ज्येष्ठवदिष्यते । ज्येष्ठ २

वीर्य, ३ बलशुक्रप्रभावेषु वीर्यं तेजश्च कीर्तितम् ॥ २०४ तेजस् ३

ऊर्णायु २ ऊर्णायुरिष्यते मेष ऊर्णायुर्मेषकम्बलः ।

विमान २ विमानं देवतायाने सप्तभूमे च वेश्मनि ॥ २०५

श्रेयस् ३ धर्ममङ्गलयोः श्रेयः प्रशस्तातिशयेऽपि च ।

पिचण्ड २ पिच(चि)ण्ड उदरे ज्ञेयः पिच(चि)ण्डोऽवयवः पशोः ॥ २०६

ग्रहण ३ त्रयं ग्रहणमिच्छन्ति बन्दीं स्वीकारमादरम् ।

सुरभि ३ मधुमासः सुगन्धिश्च सुरभिः सुरभिश्च गौः ॥ २०७

रुचि ३ अभिष्वङ्गाभिलाषौ च दीप्तिश्च रुचिरिष्यते ।

बिम्ब ३ मण्डले प्रतिबिम्बे च बिम्बं स्याद्बिम्बिकाफले ॥ २०८

मन्द ६ मन्दाः स्वैरालपरोगार्तमूढाभाग्यशनैश्चराः ।

हायन ३ तिस्रश्च हायनाभिख्या व्रीहिसंवत्सरार्चिषः ॥ २०९

अब्ज ४ अब्जो धन्वन्तरौ चन्द्रे स्यादब्जं शङ्खपद्मयोः ।

ग्रह ४ सूर्यादौ पूतनादौ च राहुनिर्बन्धयोर्ग्रहः ॥ २१०

वत्स ४ पुत्रादौ तर्णके वर्षे वत्सो वत्सं च वक्षसि ।

ख ३ खमिन्द्रिये खमाकाशे खं स्वर्गेऽपि प्रयुज्यते ॥ २११

अवरोह ३　अवरोहोऽवतरणे पादपाङ्गे लतोद्गमे ।
काष्ठा ४　काष्ठा दिक्कालमर्यादाप्रकर्षेषु प्रयुज्यते ॥ २१२
व्युत्थान २　स्वातन्त्र्यकृत्ये व्युत्थानं विरोधाचरणे तथा ।
काच ३　मृद्भेदाक्षिगदौ काचौ काचः शिक्येऽपि दृश्यते ॥ २१३
धामन् ४　तेजोजन्मप्रभावेषु स्मृतं धाम गृहेषु च ।
वरिष्ठ २　वरिष्ठं स्याद् गुरुतमं तथा वरतमं च यत् ॥ २१४
अरुष्कर २　अरुष्करः स्याद् व्रणकृद्भल्लातकमरुष्करम् ।
आशितंभव २　आशितंभवमन्नाद्यं तृप्तिरप्याशितंभवः ॥ २१५
ज्योतिस् ४　दीप्तिताराहुताशेषु ज्योतिर्ज्योतिर्विलोचने ।
कलाप ४　कलापः संहतौ बर्हे काञ्चीतूणीरयोरपि ॥ २१६
शारद ३　शारदौ वर्षशालीनौ प्रत्यग्रं शारदं विदुः ।
ग्रामणी ३　पतिप्रधाने ग्रामण्यौ ग्रामण्यं (णीम्) वक्ति नापितम् ॥ २१७
सौरभ्य २　सौरभ्यमाहुः सौगन्ध्यं सौरभ्यं च मनोज्ञता ।
भाण्ड ३　तुरंगाभरणे पात्रे भाण्डं मूलवणिग्धने ॥ २१८
अपभ्रंश ३　पतने स्यादपभ्रंशो भाषाभेदापशब्दयोः ।
पेचक २　उलूकगजलाङ्गूलमूलयोरपि पेचकः ॥ २१९
करभ २　कनिष्ठामणिबन्धान्तरो(रु)ष्ट्रयोः करभो मतः ।
मार्ग ४　मासान्वेषणयोर्मार्गो मार्गो मृगमदाध्वनोः ॥ २२०
सारङ्ग ३　सारङ्गः शबलो वर्णः सारङ्गावेणचातकौ ।
हस्तिमल्ल २　हस्तिमल्लौ विजानीयादैरावतविनायकौ ॥ २२१
गुच्छ २　स्तबके हारभेदे च गुच्छमिच्छन्ति सूरयः ।
स्थित २　स्थितमूर्ध्वं विजानीयात्प्रतिज्ञानवति स्थितः ॥ २२२
बभ्रु ३　नारायणः स्मृतो बभ्रुर्बभ्रू नकुलपिङ्गलौ ।
पत्त्रिन् ३　श्येनाख्यो विहगः पत्त्री पत्त्रिणौ शरपक्षिणौ ॥ २२३

अपवाद २	अप(व)वादं विदुर्विन्दामप(व)वादो निदेशनम् ।	
क्रन्दन २	आह्वानं क्रन्दनं विद्यात्क्रन्दनं रुदितध्वनिः ॥ २२४	
धव ३	धवो नरो धवो वृक्षो धवो भर्ता च योषिताम् ।	
तमस् ४	ध्वान्तं तमस्तमो राहुस्तमः शोकस्तमो गुणः ॥ २२५	
गर्जित २	स्वनो गर्जितमब्दानां गर्जितो मत्तकुञ्जरः ।	
कमल ३	कमला श्रीर्जलं पद्मः कमलं कमलो मृगः ॥ २२६	कमला १
गुहा २	पृश्निपर्णी गुहा ज्ञेया गुहा पर्वतगह्वरम् ।	
मदकल २	मत्तः करी मदकलो मदेनाव्यक्तवाक्च यः ॥ २२७	
सम ३	समा वर्षं समं सर्वं समं साधु समं सदृक् ।	समा १
क्षण ४	क्षणो व्यापारशून्यत्वे मुहूर्तोत्सवपर्वसु ॥ २२८	
उषा २	उषा रात्रिस्तदन्ते च स्यादुषाध्वनिरव्ययम्(यः) ।	
बाल ५	बालः केशाज्ञडिम्भेषु ह्रीवेरे गजवालधौ ॥ २२९	
शतपत्त्र २	दार्वाघाटः शतपत्त्रः शतपत्त्रं सरोरुहम् ।	
एकाग्र २	एकाग्रमेकतानाख्यमेकाग्रं स्यादनाकुलम् ॥ २३०	
कलिङ्ग २	भवेत्कलिङ्गो धूम्याटः कलिङ्गं कौटजं फलम् ।	
अयन २	अयनं पथि सूर्यस्याप्युदग्दक्षिणतो गतौ ॥ २३१	
त्रुटि ४	सूक्ष्मैलायां कालमाने त्रुटिरल्पेपि संशये । (त्रुटिरल्पे प्रशस्यते)	
पराग ३	पुष्परेणौ परागः स्यात्स्नानीयरजसोरपि ॥ २३२	
कद्रु १	नागानां जननी कद्रुः कद्रुः कनकपिङ्गलः	कद्रू १
पवन २	पाकस्थानं कुलालस्य पवनं पवनो मरुत् ॥ २३३	
शोण ३	शोणः स्याद्बन्धुजीवाभे नदे लोहितवाजिनि ।	
लोहित २	लोहितं रक्तवद् दृष्टं क्षतजारुणयोरपि ॥ २३४	रक्त २

हरिणी	३	सुवर्णप्रतिमामृग्योर्हरिणी हरिता च या ।
अवदात	३	अवदातः सिते गौरे परिशुद्धे च दृश्यते ॥ २३५
तनु	५	तनुस्त्वगल्पकायेषु तनुः स्याद्विरले कृशे ।
आस्था	३	आस्थामालम्बनं विद्यादास्था चास्थानयत्नयोः ॥ २३६
शिपिविष्ट	३	शिपिविष्टः शिवो देवो दुश्चर्मा खलतिश्च यः ।
कट	५	शवे श्रोणौ क(कि)लिञ्जे च गजगण्डे भृशे कटः ॥ २३७
वृजिन	३	वृजिनं किल्बिषे भुग्ने वृजिनश्च शिरोरुहः ।
क्षेत्र	४	केदारे वपुषि क्षेत्रं सिद्धस्थानकलत्रयोः ॥ २३८
कपोत	२	पारावतः कपोतः स्यात्कपोतो विहगान्तरम् ।
शिशिर	३	शीतले शिशिरं विद्यात्तुषारऋतुभेदयोः ॥ २३९
करीर	३	वृक्षप्रभेदे कलशे करीरो वैणवाङ्कुरे ।
नेत्र	४	नेत्रं वस्त्रे मथिगुणे तरुमूले विलोचने ॥ २४०
सार्वभौम	२	सर्वपृथ्वीपतौ राज्ञि सार्वभौमोथ दिग्गजे ।
रेवती	३	ऋक्षे लाङ्गलिदारेषु रेवत्याख्याथ मातृषु ॥ २४१
पक्षति	२	प्रतिपत्पक्षतिर्ज्ञेया गरुन्मूलेपि पक्षतिः ।
सारस	२	सारसो विहगः ख्यातः सारसं सरसीरुहम् ॥ २४२
शर्करा	३	सितोपलायां शकले रोगभेदे च शर्करा ।
जिष्णु	३	शक्रजित्वरयोर्जिष्णुर्जिष्णुर्मध्यमपाण्डवे ॥ २४३
पोत्र	२	मुखाग्रं पोत्रमुद्दिष्टं सूकरस्य हलस्य च ।
अष्टापद	२	सुवर्णं शारिफलकं द्वयमष्टापदं विदुः ॥ २४४
चषक	२	चषकं शी(सी)धु विज्ञेयं चषकं मद्यभाजनम् ।
उपग्रह	२	उपग्रहाख्यं द्वितयं स्याद्बन्दिरनुकूलनम् ॥ २४५
श्रेणि	२	श्रेणिः समानशिल्पानां संहतिः श्रेणिरावलिः
अर्घ्य	२	अर्घार्थं यत्तदर्घ्यं स्यादर्घ्यो यश्चार्घमर्हति ॥ २४६

कल्याण ३ कल्याणं मङ्गलं विद्यात्काञ्चनं च यदक्षयम्
आतिथ्य २ आतिथ्यं स्यादतिथ्यर्थ आतिथ्यमतिथिं विदुः ॥ २४७
(आतिथ्यं यदतिथ्यर्थमातिथ्यमातिथिं विदुः ॥)
पर्याप्त ४ शक्तौ(क्ते)निवारणे तृप्तौ पर्याप्तं स्याद्यथेप्सिते ।
अत्यय ४ कृच्छ्रे दण्डे च दोषे च नाशे च विदुरत्ययम् ॥ २४८
केतु ३ पताकायां मतः केतुः केतुरुत्पातचिह्नयोः ।
विवध ३ पर्याहाराध्वभारेषु मतौ विवधवीवधौ ॥ २४९ वीवध ३
जैवातृक २ जैवातृकौ विजानीयादायुष्मन्मृगलाञ्छनौ ।
भुजिष्य २ अनधीनो भुजिष्याख्यो भुजिष्यः प्रेष्य इष्यते ॥ २५०
विषयिन् २ इन्द्रियं विषयि ज्ञेयं विषयी विषयान्वितः ।
विधि ४ विधी विधानधातारौ विधिः स्यात्कालदैवयोः ॥ २५१
अवधि ३ अवधी कालगर्तौ स्तः सीमानोऽवधयः स्मृताः ।
क्षम ३ क्षमा तितिक्षा पृथ्वी च योग्ये शक्ते हिते क्षमम् ॥ २५२ क्षमा २
समुन्नद्ध २ समुन्नद्धाभिधानौ द्वौ पण्डितंमन्यगर्वितौ ।
अभिजात ३ न्याय्ये कुलीनबुधयोरभिजातपदं विदुः ॥ २५३
आच्छादन २ आच्छादनं संपिधानं वस्त्रमाच्छादनं मतम् ।
आकार २ विदुराकृतिमाकारमाकारो गात्रवैकृतम् ॥ २५४
विष्टर ३ विष्टरः कुशमुष्टौ स्यात्पीठपादपयोरपि ।
भङ्ग २ भेदकल्लोलयोरभङ्गो भङ्गा सस्यं शणाह्वयं ॥ २५५ भङ्गा १
अपदेश ४ अपदेशं विदुर्लक्ष्ये निमित्तव्याजयोस्तथा ।
निगम ३ जानीयान्निगमं वेदे नगरेथ वणिक्पथे ॥ २५६
अभिषङ्ग ३ आक्रोशशापाभिभवेष्वभिषङ्गपदं विदुः ।
संनय २ संनयः समवाये स्यात्पृष्ठस्थायिबले तथा ॥ २५७
उष्णीष २ शिरोवेष्टनमुष्णीषमुष्णीषं मुकुटं विदुः ।
किंशारु २ स्याद्व्रीहिशूकः किंशारुः किंशारुर्विशिखो मतः ॥ २५८

आकर्ष ३	आकर्षः शारिफलके द्यूतपाशकयोरपि ।
सुवर्ण २	सुवर्णमिष्यते सद्भिर्हेमकर्षे च हेम्नि च ॥ २५९
संग्रह ३	संग्रहो बृहदुद्रङ्गे ग्रहसंक्षेपयोरपि ।
कूप ३	गर्तोदपानयोः कूपः कूपः स्याद्गुणवृक्षके ॥२६०
गुल्म ४	सैन्यभेदे रुजायां च गुल्मो विटपथद्रुयोः ।
क्षय ४	क्षयौ निलयकल्पान्तौ क्षयोपचयरोगयोः ॥२६१
आक्रन्द ३	आक्रन्दः क्रन्दनध्वाने नाथदारुणयुद्धयोः ।
उत्सव ३	अमर्षोत्सेकयोरिच्छाप्रसवेष्युत्सवं विदुः ॥ २६२
आडम्बर ३	आडम्बरः समारम्भे गजगर्जिततूर्ययोः ।
स्थूलोच्चय २	स्थूलोच्चयोप्यसामग्र्ये गजानां मध्यमे गते ॥ २६३
प्रतियत्न ३	संस्कारे प्रतियत्नः स्यादुपग्रहणलिप्सयोः ।
पटु ३	पटुरामयनिर्मुक्तः पटुश्चतुरतीक्ष्णयोः ॥ २६४
वलज ४	क्षेत्रे चारुस्त्रियां सस्ये पूर्द्वारे वलजाभिधा । वलजा ४
उदार ३	उदारो दातृमहतोरुदारं दक्षिणं विदुः ॥ २६५
शकरी २	शकरी छन्दसि ज्ञेया शकरी मेखला कचित् ।
आसुतीवल २	यज्वा च कल्यपालश्च द्वयं स्यादासुतीवलः ॥ २६६
भेद ३	उपजापो विशेषश्च भेदो भेदो विदारणम् ।
वप्र ४	पितृकेदारयोर्वप्रो वप्रः प्राकाररोधसोः ॥२६७
राजन् ४	राजा नृपः प्रभू राजा राजा क्षत्रियचन्द्रयोः ।
शिशुमार २	शिशुमारा जलोद्भूतजन्तौ तारामयाच्युते ॥ २६८
अस्र ३	बाष्पोऽस्र(श्र)मस्रं रुधिरमस्रः शिरसिजः स्मृतः ।
आहत ३	मिथ्योक्तौ ताडिते विद्यादाहते गुणिते तथा ॥ २६९
यादसांपति २	यादसांपतिरम्भोधिः प्रचेता यादसांपतिः ।
कूल २	सैन्यस्य पश्चिमे भागे प्रतीरे कूलमिष्यते ॥ २७०

परीष्टि २ परिचर्या परीष्टिः स्यात्परीष्टिश्च गवेषणे ।

दर ३ दरो भये च गर्ते च किंचिदर्थे दरा(रो)ऽव्ययम् ॥ २७१

पर्यङ्क २ पर्यस्तिकायां पर्यङ्कः पर्यङ्कः शयनं तथा ।

कारा २ कारा बन्धनशालायां कारा बन्धनमात्रके ॥ २७२

मूर्धाभिषिक्त २ मूर्धाभिषिक्तो भूपाले क्षत्रिये च प्रयुज्यते ।

वंश ३ वंशोन्वयः समूहश्च वंशो वंशाश्च वेणवः ॥ २७३

रजस् ३ रजो गुणे रजो रेणुर्योषितामार्तवं रजः ।

आधि ३ आधिं वदन्त्यधिष्ठाने बन्धके व्यसने तथा ॥ २७४

खल ५ खलं भूस्थानकल्केषु पामरक्रूरयोः खलः ।

वृत्तान्त ४ वृत्तान्तः प्रक्रियायां स्यात्कार्त्स्न्ये वार्ताविशेषयोः ॥ २७५

(कार्त्स्न्यवार्ताविशेषयोः ॥)

सूत ४ सूतः क्षत्राद् ब्राह्मणीजे तक्षिण सारथिबन्दिनोः ।

(सूतः शूद्रात्क्षत्त्रियाजे)

कुण्डलिन् २ कुण्डली भुजगो येन पिनद्धमपि कुण्डलम् ॥ २७६

दिवाकीर्ति २ जनंगमो दिवाकीर्तिर्दिवाकीर्तिश्च नापितः ।

माल्य २ माल्यं सुमनसां माला माल्यं सुमनसोपि च ॥ २७७

गोप ३ ग्रामौघाधिकृते गोपो गोष्ठाध्यक्षेऽथ बल्लवे ।

दक्ष ३ इष्यते चतुरे दक्षस्ताराचूडे प्रजापतौ ॥ २७८

वेग ३ जवे प्रवाहे किंपाके वेगशब्दस्त्रिषु स्मृतः ।

प्रदर ३ रोगप्रभेदे प्रदरः प्रदरः शरभङ्गयोः ॥ २७९

समुदय ३ समुद्गमे समुदयः संग्रामनिकुर(रु)म्बयोः ।

नग २, अग २ नगागौ शिखरीत्येतत्त्रयं पर्वतवृक्षयोः ॥ २८० शिखरिन् २

वाह ३ बाहुरेव स्मृतो वाहो वाहो मानतुरंगयोः ।

बाण ३ दैत्यमार्गणयोर्बाणो बाणो दासीकुर(रु)ण्टकः ॥ २८१

सादिन् २ सादिनः स्यन्दनारोहा अश्वारोहाश्च सादिनः ।
व्याड(ल)३ भुजगश्वापदक्रूरास्त्रयो व्याडा(ला) इति स्मृताः ॥ २८२
विश् २ विशो भूमिस्पृशो वैश्या विशो भूमिस्पृशो नराः । भूमिस्पृश् २
सालावृक ३ त्रयः सा(शा)लावृकाभिख्याः श्वसृ(शृ)गालवलीमुखाः ॥ २८३
आश्रम २ आश्रमो ब्रह्मचर्यादिराश्रमो मठ इष्यते ।
निराकृति ३ अस्वाध्याये निराकारे प्रत्यादेशे निराकृतिः ॥ २८४
जीवक २ जीवकः क्षपणो ज्ञेयः प्राणदोऽपि च जीवकः ।
माणवक ३ हारभेदे माणवको वाले कुपुरुषे तथा ॥ २८५
निवात ३ आश्रये दृढसंनाहे निवातो वातवर्जिते ।
पुलाक ३ संक्षेपे तुच्छधान्ये च पुलाको भक्तसिक्थके ॥ २८६
कटक ३ राजधान्यां गिरेरङ्गे वलये(यं) कटकं विदुः ।
तरल ३ तरलो भास्वरे हारमध्यरत्नेथ चञ्चले ॥ २८७
दव २ वने च वनवह्नौ च दवो दाव इवेष्यते । दाव २
शिल १ शिला द्वाराधरं दारु शिलमुञ्छः शिला दृषत् ॥ २८८ शिला २
कोश ५ पेश्यां दिव्ये धने कोशः कुड्मलासिपिधानयोः ।
नासा २ विज्ञेया नासिका नासा नासा द्वारोर्ध्वदारु च ॥ २८९
अन्ध २ अन्धो दर्शननिर्मुक्तो जन्तुरन्धं तमो मतम् ।
शाकर २ शाकरोऽनडुहि ज्ञेय उक्तं छन्दसि शाक्वरम् ॥ २९०
क्रूर ३ नृशंसकठिनौ क्रूरौ क्रूरं विद्याद् भयंकरम् ।
दृष्टान्त २ दृष्टो दृष्टान्तशब्दोयमुदाहरणशास्त्रयोः ॥ २९१
सत्र ४ सत्रं यज्ञे सदादाने छादनारण्ययोरपि ।
क्षेम २ जानीयान्मङ्गलं क्षेमं क्षेमं लब्धार्थरक्षणम् ॥ २९२
देवन ३ व्यवहारे जिगीषायां क्रीडायामपि देवनम् ।
साल ३ प्राकारवृक्षयोः सा(शा)लः सा(शा)लः सर्जतरुः स्मृतः ॥ २९३

प्रतिष्कश ३ वार्ताहरे पुरोगे च सहाये च प्रतिष्कशः ।
पत्ति ३ सैन्यभेदे पदातौ च पत्तिः पत्तिर्गतावपि ॥ २९४
पलल २ पललं तिलमिश्रे(चूर्णे) स्यात्पललं पिशितेपि च ।
बन्धुर २ बन्धुरं सुन्दरे दृष्टं बन्धुरं नम्रवाचकम् ॥ २९५
जगत् २ जगच्चराचरमिव भुवने गतिमत्यपि । चराचर २
प्रतिक्षिप्त २ प्रेषिते स्यात्प्रतिक्षिप्तं प्रतिक्षिप्तं निराकृते ॥ २९६
अनय ३ व्यसनेष्वशुभे दैवे विपत्तावनयस्त्रिपु ।
स्पर्श ४ रुजायां स्पर्शके स्पर्शो दानस्पर्शनयोरपि ॥ २९७
परिवार २ परिवारः परिजने तथा खड्गपिधानके ।
बन्धकी २ पुंश्चली बन्धकी विद्यात्करेणुरपि बन्धकी ॥ २९८
अपाचीन २ विपर्यस्तमपाचीनमपाचीनमपाग्गतिः ।
पक्क २ विनाशाभिमुखं पक्कं पक्कं परिणतार्थकम् ॥ २९९
जीवितेश २ प्रयुज्यते जीवितेशो यमजीवितनाथयोः ।
कनीयस् ३ अत्यल्पयूनोरनुजे कनीयान्स्यात्कनिष्ठवत् ॥ ३०० कनिष्ठ ३
वयस् ३ वयो बाल्यादि पक्षी च यौवनं च वयः क्वचित् ।
लघु ४ शीघ्रे मनोज्ञे निःसारे लघुः स्यादगुरुद्रुमे ॥ ३०१
सवन ३ सोमनिर्दलने स्नाने यजने सवनं मतम् ।
इरा ४ पृथिव्यां वाचि पानीये मदिरायामिरा मता ॥ ३०२
यातयाम २ परिभुक्तोज्झिते जीर्णे यातयामपदं विदुः ।
उच्छ्रित ३ समुन्नते(द्धे) प्रवृद्धे च जाते च विदुरुच्छ्रितम् ॥ ३०३
केवल ३ केवलः कृत्स्न एकश्च केवलश्चावधारितः ।
सत् ५ सत्सत्येभ्यर्हिते साधौ विद्यमानप्रशस्तयोः ॥ ३०४
जाति ५ जातिश्छन्दसि सामान्ये मालतीगोत्रजन्मसु ।
अधर ३ ओष्ठे स्यादधरो हीनमनूर्ध्वमधरं विदुः ॥ ३०५

दृषद् २ दृषन्निष्पेषणशिला केवलापि शिला दृषत् ।
उपासन २ उपासनं विदुः सेवां बाणाभ्यास उपासनम् ॥ ३०६
शुश्रूषा २ शुश्रूषा श्रोतुमाशंसा शुश्रूषा स्यादुपासनम् ।
संज्ञा ३ नामचेतनयोः संज्ञा सूचनायां करादिभिः ॥ ३०७
पीलु ४ प्रसूनकाण्डयोः पीलुः पीलुः स्याद्गजवृक्षयोः ।
आनर्त्त ३ आनर्त्तो नृत्यशालायां जन्ये(ने) जनपदान्तरे ॥ ३०८
प्रेत २ मृते भूतान्तरे प्रेतः परेतोऽप्यनयोर्मतः । परेत २
कुकूल २ शङ्कुभिर्निचिते श्वभ्रे तुषाग्नौ च कुकूलवाक् ॥ ३०९
प्रतिश्रय २ प्रतिश्रयः सभायां स्यादाश्रयश्च प्रतिश्रयः ।
निर्यूह ४ निर्यासे शेखरे द्वारे निर्यूहो नागदन्तके ॥ ३१०
समाधि ४ समाधिर्ध्याननीवाकानियमेषु समर्थने ।
घनाघन ३ घनाघनो वर्षुकाब्दे शक्रे समदहस्तिनि ॥ ३११
सिन्धु ३ नदप्रभेदे नद्यां च सिन्धुर्नीरनिधावपि ।
परंपर ५ मृगभेदे च पुत्रस्य प्रपौत्रे च परंपरः ॥ ३१२
व्यलीक ४ व्यलीकमप्रियाकार्यवैलक्ष्येष्वथ पीडने ।
निष्क्रम २ निष्क्रमो निर्गमे ख्यातो बुद्धिसंपदि निष्क्रमः ॥ ३१३
सर्ग ४ अध्याये निश्चये सर्गो निर्माणोत्साहयोरपि ।
समाह्वय २ पक्षिभिः पशुभिर्द्यूते संग्रामे च समाह्वयः ॥ ३१४
हस्त ३ पाणिनक्षत्रयोर्हस्तः संघाते केशपूर्वकः ।
निह्नव ३ अविश्वासेऽपलापे च निकृतावपि निह्नवः ॥ ३१५
(विश्वासेप्यपलापे च निकृतावपि निह्नवः ॥)
प्राय ४ मृत्यावनशने प्रायः प्रायो बाहुल्यतुल्ययोः ।
क्षत्तृ ३ क्षत्ता शूद्रात्क्षत्रियाजे सारथिप्रतिहारयोः ॥ ॥ ३१६

अभिजन २ कुले च जन्मभूमौ च विद्यादभिजनध्वनिम् ।
निर्ग्रन्थक २ निर्ग्रन्थकं विजानीयात्क्षपणे निष्परिच्छदे ॥ ३१७
महासन २ महासेनः कार्तिकेये महासैन्यपतावपि ।
आरोह ३ आरोहो योषितां श्रोणौ तरोरङ्गे समुच्छ्रये ॥ ३१८
वणिज् २ वाणिज्ये वणिजं विद्यात्तथा वाणिज्यजीविनि ।
विग्रह ३ संग्रामे विग्रहः स्यातः कायविस्तारयोरपि ॥ ३१९
अनुशय ३ विद्यादनुशयं द्वेषे पश्चात्तापानुबन्धयोः ।
धिष्ण्य ४ स्थाननक्षत्रयोर्धिष्ण्यं धिष्ण्योऽग्नौ धिष्ण्यमालये ॥ ३२०
मागध १ मागधी पिप्पलीयूथ्योर्मागधो बन्दिनि स्मृतः । मागधी २
कुसुम्भ २ महारजनं कुसुम्भं कुसुम्भश्च कमण्डलुः ॥ ३२१
जगल २ जगलः पिष्टमद्यं च मेदको जगलः स्मृतः ।
करक २ कमण्डलुश्च करकः करकश्च घनोपलः ॥ ३२२
परिवाप २ परिवापो जलस्थानं परिवापः परिच्छदः ।
वारि २ कारिणां बन्धनी वारिरम्बु वारीति विश्रुतम् ॥ ३२३
कुमारी २ अयं द्वीपः कुमारी स्यात्कुमारी कन्यका स्मृता ।
वातूल २ वातूलो वातसंघाते वातूलो मारुतासहे ॥ ३२४
पाद२ अङ्घ्रि २ पादाङ्घ्रि(दांह्रि)चरणा जन्तोरङ्गे मूले च भूरुहाम् । [चरण २
विपणि २ आपणः पण्यवीथी च द्वयं विपणिसंज्ञकम् ॥ ३२५
जठर २ शब्दतत्त्वविदः कुक्षौ कठिने जठरं विदुः ।
श्याम २ शा(सा)रिवायां निशि श्यामा श्यामौ च हरितासितौ॥३२६ श्यामा २
दुन्दुभि ३ इष्यते दुन्दुभिर्भेर्यामक्षे बिन्दुत्रिकद्वये ॥ ३२७
भिक्षा ४ प्रार्थनाभृतिसेवासु भिक्षा भिक्षितवस्तुनि ।
प्रतीत ३ प्रख्यातज्ञातहृष्टेषु प्रतीतं त्रिषु विश्रुतम् ॥ ३२८

इला ४ इला गोवाग्धरित्रीषु कलत्रे चन्द्रजस्य च ।
गण्डूषा २ गण्डूषा मुखपूर्तौ च गण्डूषा प्रसृतोन्मिते ॥ ३२९
गोष्पद २ गोष्पदं गोपदश्वभ्रे गवां च गतिगोचरे ।
प्रथम २ आदौ प्रधाने प्रथमं प्रमुखेन समं विदुः ॥ ३३० प्रमुख २
मृग ४ मृगशीर्षे हस्तिजातौ मृगः पशुकुरङ्गयोः ।
तमिस्रा २ तमिस्रा सतमा रात्रिस्तमिस्रा च तमस्ततिः ॥ ३३१
अरत्नि २ अरत्निः कफणौ हस्ते सप्रकोष्ठततांगुलौ ।
गति ४ उपायो वर्त्म च गतिर्गतिर्यात्रा गतिर्दशा ॥ ३३२
घटा ३ घटा स्याद् घटना गोष्ठी करिणां घटना घटा ।
(करिसंघटने गोष्ठ्यां घटनायां घटा मता ।)
कटु ४ रसे(सः) कटुः कटुस्तीक्ष्णे मत्सराकार्ययोः कटुः ॥ ३३३
सुधा ५ गङ्गेष्टिकास्नुहीमूर्वापीयूषेषु सुधा स्मृता ।
परिघ ३ आयुधे परिघः ख्यातः परिघोऽर्गलघातयोः ॥ ३३४
उपह्वर २ उपह्वरं विजानीयान्निःशलाकसमीपयोः ।
लक्ष ३ लक्षं छद्मनि विख्यातं लक्षं संख्याशरव्ययोः ॥ ३३५
गन्ध ३ आमोदलेशयोर्गन्धो गन्धः संबन्धमात्रकः ।
कल्क ४ कल्कः पापाशये दम्भे कल्कं स्यात्पापकिट्टयोः ॥ ३३६
कोष्ठ ३ कोष्ठः कुशूले स्वीये च कुक्षाव(क्षेर)न्तर्गृहस्य च ।
कुश २ कुशा १ कुशो दर्भः कुशी फालः कुशा वल्गा कुशं जलम् ॥ ३३७ कुशी १
उपलब्धि ३ उपलब्धिर्भवेद् बुद्धौ प्राप्तौ ज्ञाने च दृश्यते ।
सार ४ सारो बले स्थिरांशे च न्याय्ये सारं वरे तथा ॥ ३३८
न्युङ्ख २ न्यङ्खः साम्नः षडोङ्कारे न्युङ्खः सम्यङ्मनोहरे ।
चटु २ चटुः पिच(चि)ण्डे भूपादेरपि सद्गुणवर्णने ॥ ३३९

शृङ्गार २ रसे नाट्यस्य शृङ्गारः शृङ्गारो गजमण्डने ।

भार २ विवधे द्विसहस्रे च पलानां भार इष्यते ॥ ३४०

आचित २ आचितः शकटोन्मेये पलानामयुतद्वये ।

वर्षाभू २ पुनर्नवायां वर्षाभूर्वर्षाभूरपि दर्दुरे ॥ ३४१

अनीकस्थ २ राजरक्षिष्वनीकस्थो रा(ग)जशिक्षाविचक्षणे ।

पुरस्कृत ३ अग्रेकृताभ्यर्चितयोरतिशस्ते पुरस्कृतः ॥ ३४२

वधू ४ नवोढयोषिति वधूः स्नुषाभार्याङ्गनासु च ।

आशय २ आशयं विदुराधारं स्यादभिप्राय आशयः ॥ ३४३

दुर्जात २ दुर्जातं व्यसने प्रोक्तमसम्यग्जातवस्तुनि ।

कुल्य १ कुल्या नदी कुल्यमस्थि कुल्या नीरप्रणालिका ॥ ३४४ कुल्या २

शुण्डा २ कुञ्जराणां करः शुण्डा शुण्डा कादम्बरी मता (तथा) ।

अपचिति ४ विद्यादपचितिं हानौ निष्कृतावर्चने व्यये ॥ ३४५

वैदेहक २ वैदेहको वाणिज्के वैश्यतो ब्राह्मणीसुते ।

(वैश्यापुत्रे च शूद्रजे ।)

आशिस् २ आशीरभीप्सिताशंसा दंष्ट्राशीरनिलाशिनाम् ॥ ३४६

प्रसिद्ध २ कृतप्रसाधने ख्याते प्रसिद्धं पण्डिता विदुः ।

उदर्क २ उदर्क उत्तरः काल उदर्कः फलमुत्तरम् ॥ ३४७

वेदना २ वेदना स्यादनुभवः पीडायामपि वेदना ।

मेखला ३ मेखला खड्गबन्धे स्यात्काञ्चीशैलनितम्बयोः ॥ ३४८

नाडी ३ कलेवरसिरा नाडी नाडी स्यात्कालनालयोः ।

वक्तव्य ३ वचोर्हे कुत्सितेऽधीने वक्तव्यं वाच्यवन्मतम् ॥ ३४९ वाच्य ३

आवाप २ प्रक्षेपे चालवाले च विदुरावापमुत्तमाः ।

कलकण्ठ २ कलकण्ठः कोकिलः स्यान्मधुरो यस्य च ध्वनिः ॥ ३५०

खनक २ मूषिकः खनकाभिख्यः खनकश्चावदारकः ।
सरक ३ इक्षुशी(सी)धौ शी(सी)धुपाने सरकं मद्यभाजने ॥ ३५१
ईरण २ निराश्रये महीभागे भवेदीर(दिरि)णमूपरे ।
पाताल २ रसातलं स्यात्पातालं पातालं वडवानलः ॥ ३५२
पारायण २ पारायणं समासङ्गः कार्त्स्न्ये पारायणं स्मृतम् ।
निरूपण २ निरूपणं दर्शने च विचारे च निरूपणम् ॥ ३५३
आराधन २ आराधनं तोषणं स्यात्प्राप्तौ चाराधनं विदुः ।
रसन ३ आस्वादने च रसनं रसनं ध्वनिजिह्वयोः ॥ ३५४
इष्वास २ इषुक्षेपक इष्वास इष्वासो(सं) धनुरिष्यते ।
रीति २ रीतिर्दग्धसुवर्णादिमले स्यादारकूटके ॥ ३५५
अत्याहित २ अत्याहितं महाभीतिर्जीवे च निरपेक्षता ।
अगाध २ अगाधमतलस्पर्शमगाधं विवरं विदुः ॥ ३५६
वान २ स्मृतं शुष्कफलं वानं वानं सीवनकर्म च ।
अनुकर्ष २ रथाधोधरणे दार्व्यनुकर्षोऽनुकर्षणे ॥ ३५७
उत्सर्ग २ उत्सर्गस्त्यागवद्दाने परित्यागे प्रयुज्यते । त्याग २
वीत ३ असाराश्वगजे शान्ते वीतमङ्कुशकर्मणि ॥ ३५८
निर्याण २ निर्याणं द्विरदस्याङ्गे निर्याणमथ निर्गमे ।
उपधि २ उपधिं व्याजमिच्छन्ति रथस्यावयवे तथा ॥ ३५९
गोमुख २ लेपने वाद्यभाण्डे च कवयो गोमुखं विदुः ।
भागधेय २ भागधेयं मतं भाग्यं भागधेयं बलिं विदुः ॥ ३६०
बादर २ कार्पासं बादरं विद्याद्बादरं कोलिकाफलम् ।
वार्द्धक ३ वार्द्धकं वृद्धसंघाते वृद्धत्वे वृद्धकर्मणि ॥ ३६१
निरसन २ निषूदने निरसनं निरासे च प्रयुज्यते ।
उपगम २ अङ्गीकृतावुपगमः समीपगमनेऽपि च ॥ ३६२

प्रणीत ३ त्रिषु प्रणीतो विहिते संस्कृतेऽग्नौ प्रवेशिते ।
घनरस २ आचक्षते घनरसं सान्द्रनिर्यासनीरयोः ॥ ३६३
शंवर ३ शंव(शम्ब)रं जलमाख्यातं शंव(शम्ब)रो मृगदैत्ययोः ।
युग ३ युगो रथस्यावयवे कृतादौ युगले युगम् ॥ ३६४
कोल ३ पोत्रिप्लवकयोः कोलः कोलं तु बदरीफलम् ।
(पोत्रिभेलकयोः कोलः कोलं च बदरीफलम् ।)
विहायस् २ विदुर्विहायसं व्योम पक्षिणश्च विहायसः ॥ ३६५
वरीयस् २ वरीयानतिविस्तीर्णो वरीयानथ सत्तमः ।
वीथी ४ पङ्क्तिवर्त्मगृहाङ्गेषु वीथी वीथो च रूपकम् ॥ ३६६
अभिहार ३ चौर्याभियोगसंनाहेष्वभिहारपदं विदुः ।
काल ५ महाकाले यमे मृत्यौ कालः समयकृष्णयोः ३६७
द्वन्द्व ४ रहस्ये कलहे द्वन्द्वं द्वन्द्वं मिथुनयुग्मयोः ।
परिबर्ह २ पार्थिवौपयिकद्रव्ये परिबर्हः परिच्छदे ॥ ३६८
परिवाह २ परिवाहो जलोच्छ्वासे नृपयोग्ये च वस्तुनि ।
अघ ३ अघमंहसि दुःखे च व्यसने स प्रयुज्यते ॥ ३६९
अवग्रह ३ गजालिके वृष्टिरोधे प्रतिबन्धेऽप्यवग्रहः ।
मेचक ३ जानीयान्मेचकं कृष्णं मेचको बर्हचूडयोः ॥ ३७०
पटल ३ पटलं छदिषि ज्ञेयमक्षिरोगसमूहयोः ।
अपह्नव २ अपह्नवोऽपलापश्च स्नेहश्चापह्नवो मतः ॥ ३७१
कौक्कुटिक २ कौक्कुटिको दाम्भिकश्च यश्चादूरेरितेक्षणः ।
लालाटिक २ लालाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च यः ॥ ३७२
हिङ्गुनिर्यास २ हिङ्गुनिर्यासशब्दोऽयं निम्बे हिङ्गुरसेऽपि च ।
पुलक ३ कृमिप्रभेदे रोमाञ्चे पुलकं प्रस्तरे विदुः ॥ ३७३

ब्रह्मबन्धु २ ब्रह्मबन्धुरधिक्षेपे निर्देशे ब्राह्मणस्य च ।
अवष्टब्ध २ अवष्टब्धं द्वयं विद्याददूरमवलम्बितम ॥ ३७४
समर्थ ३ उक्तः समर्थः संबन्धे समर्थो हितशक्तयोः ।
तल्प ३ शयनीयं विदुस्तल्पं तल्पमट्टकलत्रयोः ॥ ३७५
मन्यु ३ निगदन्ति क्रुधं मन्युं मन्युरध्वरदैन्ययोः ।
स्कन्ध ३ अंसे महीपतौ स्कन्धः समुदायसमूहयोः ॥ ३७६
कवि २ कविर्विद्वान्कविः शुक्रो विज्ञेया खलिना कवि । कवी १
अभ्यागम २ अभ्यागमोऽभ्यागमनं युद्धमभ्यागमं विदुः ॥ ३७७
प्रकाण्ड ३ प्रकाण्डो विटपे शस्ते मूलस्कन्धान्तरे तरोः ।
उपस्पर्शन २ उपस्पर्शनमिच्छन्ति स्नानाचमनयोरपि ॥ ३७८
महामात्र २ समृद्धे स्यान्महामात्रस्तथा हस्तिपकाधिपे ।
गोकर्ण २ गोकर्णो दन्दशूके स्यादङ्गुष्ठानामिकोन्मिते ॥ ३७९
प्रियक २ प्रियकः पीतसारे च मृगभेदे च दृश्यते ।
चूर्ण २ चूर्णानि वासयोगाः स्युश्चूर्णो धूलिः सशर्करा ॥ ३८०
(चूर्णो धूलिरुदाहृतः ॥ ३८०)
तरस्विन् २ तरस्विनो वेगवन्तो बलिनश्च तरस्विनः ।
अन्त ३ स्वरूपप्रान्तयोरन्तमन्तिकेऽपि प्रयुज्यते ॥ ३८१
अणु २ व्रीहावप्यणुलौहित्यौ सूक्ष्मसागरयोः क्रमात् । लौहित्य २
मौलि ३ मौलिः संयतकेशेषु चूडामुकुटयोस्तथा ॥ ३८२
गोलक ३ जारजे विधवापुत्रे गोलको गोलको गुडे ।
अव्यक्त २ अव्यक्तशब्दं जानीयादस्फुटे परमात्मनि ॥ ३८३
कम्बल २ कथ्यते कम्बलः साम्ना प्रावारेऽपि च कम्बलः ।
आसन २ आसनं करिणां स्कन्धः पीठमासनमिष्यते ॥ ३८४

शङ्कु ३ संख्याकीलकयोः शङ्कुः शङ्कुः प्रहरणान्तरे ।
आधार ३ आलवालेऽधिकरणे वाप्यामाधार इष्यते ॥ ३८५
प्रपञ्च २ विपर्यासः प्रपञ्चः स्यात्प्रपञ्चो विस्तरो मतः ।
कुहन १ ईर्ष्यालुर्दम्भचर्या च कुहनः कुहना क्रमात् ॥ ३८६ कुहना १
(ईर्ष्यालौ दम्भचर्यायां)
अकूपार २ अकूपारः समुद्रः स्यादकूपारश्च कूर्मराट् ।
पृषत् २ पृषन्मृगे पृषद्बिन्दौ पृषतोऽप्यनयोर्मतः ॥ ३८७ पृषत् २
अनन्त २ नभोऽनन्तमनन्ता भूरनन्तो नागनायकः । अनन्ता १
(... ... ... तो नागनायकः ।)
संधि ३ संधिर्भगं सुर(रु) ङ्गा च संधिं संघट्टनं विदुः ॥ ३८८
निग्रह २ निग्रहो भर्त्सनाभिख्यो मर्यादां निग्रहं विदुः ।
गन्धवह १ समीरणो गन्धवहो नासा गन्धवहा मता ॥ ३८९ गन्धवाहा १
सत्तम २ जातीयात्सत्तमं श्रेष्ठं साधीयानपि सत्तमः ।
तोक्म २ हरिन्मात्रं च तोक्मं स्यात्तोक्मश्च हरितो यवः ॥ ३९०
ओजस् ४ ओजो बलमवष्टम्भ ओजः स्यात्त्विट्प्रकाशयोः ।
स्पर्शन ३ समीरणे(णः) स्पर्शनाख्या(ख्यः) स्पर्शनं स्पर्शदानयोः ॥ ३९१
उपताप २ उपतप्ते गदे विद्यादुपतापं विचक्षणः ।
भगवती १ ज्ञेया भगवती दुर्गा भगवान्बुद्धपूज्ययोः ॥ ३९२ भगवत् २
शिशुक ३ बालोऽतिमात्रं शिशुकः शिशुकः शिशुमारकः ।
चय २ प्राकारमूलबन्धश्च समूहश्च चयो मतः ॥ ३९३
वेला ३ विकारेऽम्बुनिधेर्वेला कालमर्यादयोस्तथा ।
समापन २ समापनं विनिर्दिष्टं समाप्तिवधयोरपि ॥ ३९४
आयति २ द्वयोरायतिराख्याता प्रभावागामिकालयोः ।
निशमन २ दृष्टं निशमनं धीरैर्दर्शने श्रवणे तथा ॥ ३९५

गर्भ ३ भ्रूणे गर्भं विजानीयाज्जठरार्भकयोरपि ।
अवदान ३ अवदानमितिवृत्ते कर्मखण्डनयोस्तथा ॥ ३९६
उन्माथ ३ पाशयन्त्रकमुन्माथ उन्माथो वधघातयोः ।
भूत ५ भूतं क्ष्मादौ पिशाचादौ न्याय्ये जन्तूपमानयोः ॥ ३९७
तिलक ३ वृक्षप्रभेदे जडुले चित्रके तिलकं विदुः ।
प्रतिपत्ति ४ प्रागल्भ्ये गौरवे प्राप्तौ प्रवृत्तौ प्रतिपत्तिवाक् ॥ ३९८
पत्त्र ३ पर्णवाहनयोः पत्त्रं पत्त्रं पक्षे पतत्त्रिणाम् ।
कूर्च ३ दम्भभ्रूमध्ययोः कूर्चः कूर्चः श्मश्रुणि दृश्यते ॥ ३९९
प्राण ३ प्राणोऽसुबलयोरुक्तः प्राणो देहचरोऽनिलः ।
पात्त्र ३ योग्यभाजनयोः पात्त्रं पात्त्रं कूलद्वयान्तरम् ॥ ४००
विधा ५ विधानर्द्धिप्रकारेषु गजान्ने वेतने विधा ।
कौपीन ३ अकार्यगुह्यचीरेषु कौपीनं कवयो विदुः ॥ ४०१
छन्दस् ३ गायत्रीप्रभृति च्छन्दश्छन्दो वेदेच्छयोरपि ।
वितान ४ यागे वितान उल्लोचे शून्यविस्तारयोरपि ॥ ४०२
कोटि ४ अश्रिचापाग्रयोः कोटिः कोटिः संख्याप्रकर्षयोः ।
कक्ष्या ३ मेखलायां स्मृता कक्ष्या गजरज्जुप्रकोष्ठयोः ॥ ४०३
गञ्ज १ भाण्डागारं(रे) विदुर्गञ्जं खनौ गञ्जा सुरागृहे । गञ्जा १
तूवर २ काले प्राप्तेऽप्यशृङ्गो गौर्नरोऽश्मश्रुश्च तूब(व)रः ॥ ४०४
शम्ब २ शम्बः स्यान्मुसलाग्रस्थे लोहमण्डलके पवौ ।
विविक्त ३ विविक्तं रहसि ख्यातमसंपृक्तपवित्रयोः ॥ ४०५
खेट ३ ग्रामभेदे विदुः खेटं कफकुत्सितयोरपि ।
शृङ्ग ३ प्रभुत्वे पर्वताग्रे च शृङ्गमङ्गे पशोरपि ॥ ४०६
पङ्क्ति ३ छन्दोविशेषे लेखायां दशसंख्यासु पङ्क्तिवाक् ।
कण २ धान्यस्यावयवे लेशे कणः स्यात्पिप्पली कणा ॥ ४०७ कणा १

सून १ सूनं पुष्पं वधस्थाने सूना जिह्वातलेपि च । सूना २
रौहिष ४ रौहिषं रक्तकतृणं रौहिषो हरिणान्तरम् ॥ ४०८
धर्षण २ धर्षणं सुरतं विद्यादभिभूतिश्च धर्षणम् ।
कपाल २ शिरखोऽस्थि कपालं स्याद् घटादेः शकलं च यत् ॥ ४०९
प्रणाय्य २ अभिलापविनिर्मुक्ते(क्तः) प्रणाय्यः स्यादसंमते(तौ) ।
सारसन २ मेखलायां सारसनमुरस्त्रे च प्रयुज्यते ॥ ४१०
जटा २ जटा कचविकारे च मुले च धरणीरुहाम् ।
कलहंस २ कादम्बे राजहंसे च कलहंसः प्रयुज्यते ॥ ४११
कमठ २ भाण्डप्रभेदः कमठः कमठः कच्छपो मतः ।
काकोल २ काकोलो द्रोणकाकः स्यात्काकोलो विषमुच्यते ॥ ४१२
करहाट २ पिण्डीतके पद्मकन्दे करहाटपदं विदुः ।
(पुष्पजातौ पद्मकन्दे)
संतति २ तोक २ पुत्रयोः सह संतत्या तोकापत्यप्रसूतयः ॥४१३ अपत्य २ प्रसूति २
विबुध ५ विज्ञेया विबुधा देवा विबुधाः पण्डिता अपि ।
अङ्गज ३ अङ्गजो मन्मथे पुत्रे शोणितं कचिदङ्गजम् ॥ ४१४
कर्कश ३ कर्कशः स्यात्साहसिके खरस्पर्शेऽथ निर्दये ।
सामुद्र २ लवणादौ समुद्रस्य सामुद्रं देहलक्षणे ॥ ४१५
पक्ष्मन् ३ पक्ष्म सूत्रादिसूक्ष्मांशे किञ्जल्के नेत्रलोमनि ।
किम् ४ कुत्साप्रश्नवितर्केषु क्षेपे किंशब्द इष्यते ॥ ४१६
सभा ४ सभा सभ्याः सभा गोष्ठी सभा द्यूतं सभा गृहम् ।
विषाण २ विषाणं करिणां दन्तो विषाणं शृङ्गमुच्यते ॥ ४१७
शरण ४ शरणं गृहरक्षित्रोः शरणं रक्षणे वधे ।
पार्श्व २ वक्रोपायं विदुः पार्श्वं पार्श्वं चावयवान्तरम् ॥ ४१८

सीमन् ३ आघाटे कथिता सीमा स्थितौ क्षेत्रे च दृश्यते ।
एक ३ एकं श्रेष्ठे विजानीयादन्यकेवलयोरपि ॥ ४१९
बृहती ३ क्षुद्रायां क्षुद्रवार्ताक्यां बृहती छन्दसि क्वचित् (स्मृता) ।
तारक २ नक्षत्रे चाक्षिमध्ये च तारकं तारकापि च(यथा) ॥४२० तारका २
कान्त २ प्रियङ्गुयोषितोः कान्ता कान्तः प्रियमनोज्ञयोः । कान्ता २
जाल ४ गवाक्षवृन्ददम्भेषु जालं मत्स्यादिबन्धने ॥ ४२१
संवित्ति २ संवित्तिः प्रतिपत्तिः स्यात्संवित्तिरविवादिता ।
जघन्य २ पश्चाद्वाचि जघन्यं स्याज्जघन्यं गर्हितार्थकम् ॥ ४२२
संपराय ३ आपदायतियुद्धेषु संपरायपदं विदुः ।
आलि ३ आलिः सखी सेतुरालिरालिरावलिरिष्यते ॥ ४२३
परिधि २ परिधिर्यज्ञियतरोः शाखायामुपसूर्यके ।
अधिष्ठान३ रथाङ्गाध्यासनपुरेष्वधिष्ठानपदं विदुः ॥ ४२४
धात्री ३ आमलक्युपमाता च धात्री धात्री च मेदिनी ।
श्राद्ध २ हव्यकव्यविधिः श्राद्धं श्राद्धः श्रद्धासमन्वितः ॥ ४२५
वाणिनी ३ नर्तक्यामथ मत्तायां विदग्धायां च वाणिनी ।
तन्त्री २ वीणादीनां गुणस्तन्त्री तन्त्री देहसिरा मता ॥ ४२६
कारिका २ कृतौ विवरणश्लोके यातनायां च कारिका ।
ऊर्णा २ भ्रूमध्यावर्तमेषादिलोम्नोरूर्णा निगद्यते ॥ ४२७
अवतंस २ शेखरे कर्णपूरे स्यादवतंसो वतंसवत् । वतंस
बालिका २ बालायां बालुकायां च बालिकाशब्द इष्यते ॥ ४२८
जघन २ श्रोणिभागे स्त्रियाः पूर्वे जघनं जघनं कटिः ।
नितम्ब २ नितम्बोऽपरस्तस्याः श्रोणिभागः कटिस्तथा ॥ ४२९
समाहित २ समाहितं प्रतिज्ञातं समाधिस्थः समाहितः ।
उदूढ २ उदूढ ऊढमात्रे स्यादुदूढः पृथुलेऽपि च ॥ ४३०

कन्द २ कन्दानि मूलसस्थानि विदुः कन्दांश्च(न्दानि) शूरणान् ।
कृच्छ्र २ आहुः कृच्छ्राणि दुःखानि कृच्छ्रं सांतपनादिकम् ॥ ४३१
दशा ३ दशावस्था दशा वर्तिर्वाससोऽवयवे दशा ।
किष्कु २ सप्रकोष्ठकरः किष्कुर्वितस्तिः किष्कुरिष्यते ॥ ४३२
अवगीत ३ अवगीतं मुहुर्दुष्टे निर्वादे गर्हितेऽपि च ।
तृष्णा,२ तृष२ तृष्णा तृट् तर्ष इत्येते शब्दा लिप्सापिपासयोः ॥ ४३३ तर्ष २
अजिर ३ अजिरं विषये काये विद्यादजिरमङ्गनम् ।
बीभत्स ३ बीभत्सो विकृते क्रूरे तथा मध्यमपाण्डवे ॥ ४३४
त्वष्टृ २ देवशिल्पिन्यपि त्वष्टा त्वष्टारं वर्धकिं विदुः ।
आनद्ध २ मुरजादिकमानद्धमानद्धं बद्धमात्रकम् ॥ ४३५
निर्यातन३ न्यासार्पणे वैरशुद्धौ दाने निर्यातनं विदुः ।
गन्धन ३ उत्साहने सूचनायां गन्धनं स्यात्प्रकाशने ॥ ४३६
पूर्व ३ पुमांसः पूर्वजाः पूर्वे पूर्वं प्राक् पूर्वमग्रतः ।
अभिनीत३ अभिनीतं संस्कृते च न्याय्ये चामर्षवत्यपि ॥ ४३७
उद्यान ३ प्रयोजने निःसरणे स्यादुद्यानं वनान्तरे ।
व्यञ्जन ४ व्यञ्जनं तेमने चिह्ने श्मश्रुण्यवयवे तथा ॥ ४३८
संस्थान ४ संस्थानमाकृतौ मृत्यौ संनिवेशे चतुष्पथे ।
कुशल ४ कुशलं सुकृते क्षेमे पर्याप्तौ शिक्षितेऽपि च ॥ ४३९
पावन २ स्यात्पावनः पावयिता प्रायश्चित्तं तु पावनम् ।
केतन ३ निमन्त्रणे ध्वजे कार्ये केतनं कवयो विदुः ॥ ४४०
ककुद-द ३ ककुद्वत्ककुदं श्रेष्ठे वृषाङ्गे नृपलक्ष्मणि ।
बीज ३ हेतौ रेतसि बीजं स्याद्बीजमङ्कुरकारणम् ॥ ४४१
फल ५ लाभे सस्ये शराद्यग्रे व्युष्टौ च फलके फलम् ।
धन्वन् ३ स्थलं धन्व धनुर्धन्व धन्वा मरुरपि स्मृतः ॥ ४४२

आगम २ आम्नायादागमं शास्त्रं स्यादागमनमागमः ।
प्रणव प्रह्वे च क्रमनिम्ने च प्रवणः स्याच्चतुष्पथे ॥ ४४३
दृढ ३ दृढं नितान्ते स्थूले च दृढः स्याद्बलवत्यपि ।
औशीर २ औशीरं चामरे दण्डेऽप्यौशीरं शयनासने ॥ ४४४
प्रकोष्ठ २ कक्षान्तरं प्रकोष्ठः स्यात्प्रकोष्ठः कूर्परादधः ।
उपाधि २ उपाधिर्धर्मचिन्तापि कुटुम्बव्यापृतोऽपि च (तावपि) ॥ ४४५
निर्वासन २ निर्वासनं मारणे स्यान्नगरादेर्बहिष्कृतौ ।
उद्धरण २ भुक्तोज्झितोन्मूलनयोरुक्त उद्धरणध्वनिः ॥ ४४६
कृत्य २ क्रियादेवतयोः कृत्या कृत्यं विद्विष्टकार्ययोः । कृत्या २
नाश ३ निधनानुपलम्भौ च नाशौ नाशः पलायनम् ॥ ४४७
नैगम २ नैगमः स्याद्वणिजके नैगमो नगरोद्भवे ।
किल्बिष २ पाप्मानं किल्बिषं विद्यादपराधेऽपि किल्बिषम् ॥ ४४८
अभिषव ३ सवने मद्यसंधाने स्नानेऽप्यभिषवं विदुः ।
संतान ४ संतानः संततौ देववृक्षे चापत्यगोत्रयोः ॥ ४४९
संस्त्याय २ संघाते संनिवेशे च संस्त्यायं कवयो विदुः ।
अभिमर २ विद्यादभिमरं युद्धे स्वबलादपि साध्वसे ॥ ४५०
आषाढ ३ आषाढो व्रतिनां दण्डे मासि क्षितिधरान्तरे ।
उद्धृत २ उद्धृतं स्यादुत्तुलितं भुक्त्वा चोज्झितमुद्धृतम् ॥ ४५१
विश्वकर्मन् २ देवशिल्पी विश्वकर्मा विश्वकर्मा दिवाकरः ।
अभिमर्द २ अभिमर्दं विदुर्युद्धमभिमर्दोऽभिमर्दनम् ॥ ४५२
निर्देश २ आज्ञा भवति निर्देशो निर्देशः कथनं मतम् ।
मधुक २ बन्दिनो मधुकाः कोपे मधुकं मधुयष्टिका ॥ ४५३
अनुत्तर ३ अनुत्तरमनूर्ध्वं स्यादनुदारश्रेष्ठयोरपि ।
पर ४ आत्मनोऽन्यत्र दूरे च संपन्नश्रेष्ठयोः परः ॥ ४५४

परिमल २ स्याद्विमर्दे परिमलो गन्धे जनमनोहरे ।
पाटल ३ पाटलं कुसुमे वर्णेऽप्याशुव्रीहिश्च(हौ च) पाटलः ॥ ४५५
यापन २ स्याद्यापनं निरसनं यापनं वर्तनं विदुः ।
राजीव ३ राजीवो हरिणो मत्स्यो राजीवं सरसीरुहम् ॥ ४५६
माधव ३ वसन्ते माधवो विष्णौ वैशाखे मासि माधवः ।
प्रसृत २ पाणिर्निकुब्जः प्रसृतः प्रसृतो वेगितः स्मृतः ॥ ४५७
साधी- साधीयो बाढमत्यर्थं साधीयानतिशोभनः । (यस् २
मयूख ३ मयूखः कथितो दीप्तौ ज्वालाकिरणयोरपि ॥ ४५८
अङ्ग ३ उपायगात्रयोरङ्गमङ्गवानङ्ग इष्यते ।
इष्ट २ इष्टं यज्ञेषु यद्दानमिष्टमाशंसितं मतम् ॥ ४५९
चैत्य २ विदुरायतनं चैत्यं चैत्यमुद्देशपादपः ।
लालस २ लालसं प्रार्थनामाहुरौत्सुक्यमपि लालसम् ॥ ४६०
जाङ्गल २ जाङ्गलो निर्जले देशे जाङ्गलं पिशितं विदुः ।
न्युब्ज २ विद्यादधोगतं (मुखं) न्युब्जं न्युब्जः कुब्ज उदाहृतः ॥४६१
हरण २ यौतकद्राविणं प्रोक्तं हरणं हरणं हृतिः ।
वनिता २ उत्पादितानुरागा स्त्रीवनिता वनिताङ्गना ॥ ४६२
विटप ३ शाखायां पल्लवे स्तम्बे विटपं विदुरुत्तमाः ।
विह- पिञ्जनं स्याद्विहननं विदुर्विहननं वधम् ॥ ४६३ (नन २
धवल २ धवलं सुन्दरे शुक्ले धवली गौरपि स्मृता । धवली १
ग्राम २ ग्रामः संवसथे ज्ञेयो वृन्दे शब्दादिपूर्वकः ॥ ४६४
विक्रम २ विक्रमः शक्तिसंपत्तिः क्रांतिमात्रं च विक्रमः ।
उत्थित ३ उत्थितं विदुरुत्पन्ने प्रोद्यते वृद्धिमत्यपि ॥ ४६५
कार्मुक २ शरासने कार्मुकं स्याच्छक्तमात्रे च कार्मुकः ।
अंशुक ३ स्यादंशुकं शुक्लवस्त्रे वस्त्रमात्रोत्तरीययोः ॥ ४६६

गुड २ गुडौ गोलेक्षुविकृती स्नुहीगुडिकयोर्गुडा। गुडा २
विश्रम्भ २ विश्रम्भशब्दमिच्छन्ति विश्वासे प्रणयेऽपि च ॥ ४६७
आत- आतञ्चनं प्रतीवापजवनाप्यायनार्थकम्। (ञ्चन ३
विकृत २ बीभत्सो विकृतो ज्ञेयो विकृतो रोगितेऽपि च ॥ ४६८
जीवा १ ज्या जीवा जीवितं जीवं जीवौ जन्तुबृहस्पती। जीव ३
साधु ३ जानीयाच्छोभनं साधु साधू वार्धुषिसज्जनौ ॥ ४६९
छाया ३ छाया स्यादातपाभावे प्रभाप्रतिमयोरपि।
श्रुति ३ आम्नायं श्रुतिमिच्छन्ति श्रोत्रं तत्कर्म च श्रुतिः ॥ ४७०
हरित् ४ हरित्ककुभि वर्णे च तृणवाजिविशेषयोः।
जगती ४ छन्दोविशेषे जगती पृथिव्यां विष्टपे जने ॥ ४७१
स्तन- मेघानिःस्तनिते मेघे स्तनयित्नुं विदुर्बुधाः। (यित्नु २
ग्रहराज २ ग्रहराजं विदुश्चन्द्रं ग्रहराजो दिवाकरः ॥ ४७२
मातृ ३ मातरौ गोजनन्यौ च रेवत्याद्याश्च मातरः।
चपल २ इष्यते चपला विद्युच्चपलं लोलशीघ्रयोः ॥ ४७३ चपला १
दीप्त २ दग्धे विभासिते दीप्तं दृष्टं ज्वलितवद् बुधैः। ज्वलित २
समिति ३ सभासंगमयुद्धेषु भाषन्ते सामितिं बुधाः ॥ ४७४
सिकता २ सिकता वालुकायां च देशे च सिकतान्विते।
लता २ लता व्रततिराख्याता लता शाखा च शाखिनाम् ॥ ४७५
चिरिण्टी २ स्ववासिन्यां चिरिण्टी स्याद् द्वितीयवयसि स्त्रियाम्।
कुल ४ कुलं सजातीयगणे गोत्रे जनपदे तनौ ॥ ४७६
कौले- सारमेये कुलोद्भूते कौलेयक इति स्मृतः। (यक २
प्रातिभय २ भयंकरं प्रातिभयं भयं प्रतिभयं विदुः ॥ ४७७
अभिग्रह २ अभिग्रहोऽभिग्रहणमाभियोगोऽप्याभिग्रहः।
आर्थिन् २ आर्थिनः स्युर्याचनका आर्थिनः सेवका अपि ॥ ४७८

निकृत २ निकृतः स्याद्विप्रकृतो निकृतो विप्रलब्ध(म्भ)कः ।
सृष्ट ४ मुक्तनिर्मितयोः सृष्टं सृष्टं निश्चितभूरिणोः ॥ ४७९
द्वितीया २ द्वितीया कथ्यते जाया द्वितीया पूरणी द्वयोः ।
आरम्भ २ वदन्ति वधमारम्भमारम्भः समुपक्रमः ॥ ४८०
मुक्ति २ निःश्रेयसे मोचने च मुक्तिर्मोक्षवदिष्यते । मोक्ष २
शार्ङ्ग २ धनुर्मात्रं विदुः शार्ङ्गं शार्ङ्गं विष्णोः शरासनम् ॥ ४८१
चन्द्रहास २ चन्द्रहासो रावणासिरासिमात्रे च कुत्रचित् ।
अन्तावसा- अन्तावसायी चाण्डाले नापिते च क्वचिन्मतः ॥४८२ (यिन् २
अपवर्जन २ परित्यागे च दाने च जानीयादपवर्जनम् ।
नियामक २ नियामकाः पोतवाहा नियन्तारो नियामकाः ॥ ४८३
समर्याद २ समर्यादं समीपं च मर्यादासहितं च यत् ।
पिण्डित २ संख्यातं पिण्डितं ज्ञेयं निबिडं पिण्डितं विदुः ॥ ४८४
आस्य २ मुखं मुखान्तरालं च द्वयमास्यमुदाहृतम् ।
सह्य ३ विज्ञेयं सह्यमारोग्यं सह्यौ सोढव्यपर्वतौ ॥ ४८५
छेक २ छेको विदग्धश्छेकाश्च गृहासक्तमृगाण्डजाः ।
आयोधन २ आयोधनं घातनं स्याद्युद्धमायोधनं मतम् ॥ ४८६
पीडा २ उपमर्दं विदुः पीडां पीडामाहुः कृपामपि ।
आणि १ आणिमश्रिं विजानीयादाणिरक्षाग्रकीलकः ॥ ४८७
अध्यक्ष १ प्रत्यक्षं विदुरध्यक्षमध्यक्षोऽधिकृतो मतः ।
अपाङ्ग २ अपाङ्गो लोचनान्तः स्यादपाङ्गस्तिलकेपि च ॥ ४८८
कण्ठ ३ समीपगलशब्देषु त्रिषु कण्ठं विदुर्बुधाः ।
अम्बर ३ सुगन्धिद्रव्यभेदे स्यादम्बरं व्योमवस्त्रयोः ॥ ४८९
काय ३ कायः शरीरे लक्षे च समूहे च प्रयुज्यते ।
कलत्र २ भार्यायां स्त्रीनितम्बे च कलत्रं कवयो विदुः ॥ ४९०

भद्र ४ हस्तिभेदे वृषे भद्रः स्याद् भद्रं साधुशर्मणोः ।
मलय २ आरामे मलयं विद्यात्पर्वतावयवे तथा ॥ ४९१
प्रतिकृति २ बुधा विदुः प्रतिकृतिं प्रतिमाप्रतिकारयोः ।
आयस्त ४ आयस्तः क्लेशिते क्षिप्ते कुपिते तेजिते तथा ॥ ४९२
निदाघ ३ उष्णे स्वेदाम्भसि ग्रीष्मे निदाघो घर्मवन्मतः । घर्म ३
प्रसव्य २ बुधाः प्रसव्यमिच्छन्ति प्रतिकूलानुकूलयोः ॥ ४९३
शाला २ शाला तरुस्कन्धशाखा शाला भवनमिष्यते ।
(शाला तरोः स्कन्धशाखा)
नग्न २ विदुर्दिग्वाससं नग्नं नग्ना वैतालिकादयः ॥ ४९४
कदली २ इष्यते कदली रम्भा कदली वैजयन्तिका ।
वेष्टन २ वेष्टनं मुकुटं विद्यादुष्णीपमपि वेष्टनम् ॥ ४९५
संसीद्धि २ सम्यक्सिद्धिः स्वभावश्च द्वयं संसिद्धिवाचकम् ।
अन्तर्गत २ मध्यप्राप्तं विस्मृतं च द्वयमन्तर्गतं विदुः ॥ ४९६
विशिखा २ प्रतोलीं विशिखामाहुर्विशिखा च खनित्रिका ।
उचित २ समञ्जसं स्यादुचितमभ्यस्तमुचितं विदुः ॥ ४९७
कल्पन १ कल्पनं कर्तने क्लृप्तौ कल्पना गजसज्जना । कल्पना २
पितामह २ पितामहः पितृपिता परमेष्ठी पितामहः ॥ ४९८
अहार्य २ अहार्यं कथ्यते शैलं यच्च हर्तुं न शक्यते ।
प्राध्व २ प्राध्वोऽतिमात्रं प्रणतः प्राध्वं वन्धनमिष्यते ॥ ४९९
व्यति- व्यसने व्यतिषङ्गे च विदुर्व्यतिकरं बुधाः । (कर २
उपराग २ राहुव्यसनयोरुक्तमुपरागपदं बुधैः ॥ ५००
नन्द्या- नन्द्यावर्तं विदुर्वेश्मप्रभेदे तगरद्रुमे । (वर्त २
परिवाद २ वल्लकीवादनोपाये निर्वादे परिवादवाक् ॥ ५०१
द्यो-दिव् २ द्यौः स्वर्गे नभसि ख्याता द्योशब्दोऽप्यनयोर्मतः ।

शारि	२	अक्षोपकरणं शारिः शारिः शकुनिकान्तरम् ॥ ५०२
याप्य	२	याप्यं गर्हितमिच्छन्ति याप्यं स्याद्यापनीयकम् ।
प्रतिहत	२	प्रतिस्खलितविद्विष्टौ मतौ प्रतिहतार्थकौ ॥ ५०३
प्रसूत	२	मतं प्रसूतमुत्पन्नं प्रसूतं कुसुमं विदुः ।
सेवक	२	प्रसेवः सेवको ज्ञेयः सेवाजीवी च सेवकः ॥ ५०४
आयोग	२	गन्धमाल्योपहारे स्यादायोगे व्याप्रतावपि ।
कादम्ब	२	कादम्बो विशिखो ज्ञेयः कादम्बो विहगान्तरम् ॥ ५०५
सुकृत	२	सुकृतं शोभनं कर्म पुण्यं च सुकृतं मतम् ।
हव	३	इष्यते हव आह्वानं हव आज्ञा हवः क्रतुः ॥ ५०६
विष्टि	४	आजूवेतनयोर्विष्टिः कर्मकृत्कर्मणोरपि ।
		(विष्टिं कर्मकरे विद्यात्कर्मवेतनयोरपि ।)
तपस्विन्	२	तपस्वी चानुकम्पार्हे तपस्वी च तपोधने ॥ ५०७
शुक्ति	२	मुक्तास्फोटे स्मृता शुक्तिः शुक्तिर्दुर्नामकेऽपि (मिकापि) च ।
नाभि	३	प्राण्यङ्गे क्षत्रिये नाभिः प्रधाननृपतावपि ॥ ५०८
		(प्रधाने नृपतावपि ॥ ५०८)
वडवा	२	अश्वायां कुम्भदास्यां च वडवा परिकीर्तिता ।
जर्जर	२	इन्द्रध्वजे विशीर्णे च जर्जरं परिचक्षते ॥ ५०९
हरि-		कुङ्कुमे देववृक्षे च हरिचन्दनमिष्यते । (चन्दन २
अग्रज-		अग्रजन्मा ब्राह्मणे च ज्येष्ठे भ्रातरि च स्मृतः॥५१० (न्मन्२
द्विजन्मन्	२	द्विजन्मा विहगे विप्रे द्विजातिरपि दन्तके । द्विजाति १
		(द्विजातिरिव दृश्यते ।)
उल्लिखित	२	तनूकृतं समुत्कीर्णं द्वयमुल्लिखितं विदुः ॥ ५११
क्षारक	२	पक्षिमत्स्यादिपिटके क्षारकः कोरकेपि च ।
गुञ्जा	२	वाद्यभाण्डे स्मृता गुञ्जा गुञ्जा स्यात्काकचिञ्चिका ॥ ५१२

पिप्पलक २	स्तनवृन्ते पिप्पलकं तथा सीवनसूत्रके ।	
उर्वरा २	उर्वरा सर्वसस्या भूरुर्वरा भूमिमात्रकम् ॥	५१३
प्रखर २	प्रखरोऽश्वादिसंनाहः प्रखरः स्याद् भृशं खरः ।	
स्थासक २	चर्चायां स्थासको ज्ञेयः स(स्फ)रादेरपि बुद्बुदे ॥	५१४
जयन २	अश्वादीनां च संनाहे जये च जयनं मतम् ।	
चिपिट २	खाद्यप्रभेदे चिपिटस्तथा पिच्छि(च्चि)तविस्तृते ॥	५१५
सज्जन ३	घट्टाख्ये गुल्मके साधौ सज्जनं सज्जनः क्रमात् ।	
परुष २	परुषः कर्बुरो ज्ञेयः परुषं निष्ठुरं वचः ॥	५१६
संमति २	संमतिः स्यादनुज्ञानमभिलाषोपि संमतिः ।	
पलित २	पलितं पाण्डुरः केशः पलितं कर्दमं विदुः ॥	५१७
विद्ध २	विद्धं सूच्यादिभिर्भिन्ने सादृश्ये च प्रयुज्यते ।	
पृथुक २	खाद्यप्रभेदे पृथुकः पृथुकः शिशुकेपि च ॥	५१८
कुलाय २	कुलायो नीडवद् दृष्टः स्थाने गेहे च पक्षिणाम् । नीड २	
उत्कालिका २	विद्यादुत्कालिकाशब्दमुत्कण्ठावीचिवाचकम् ॥	५१९
ईहामृग २	वृकं रूपकभेदं च द्वयमीहामृगं विदुः ।	
कारि २	क्रियायां कारिराख्याता नापितादौ च शिल्पिनि ॥	५२०
विदारण २	विडम्बने भेदने च विदारणमुदाहृतम् ।	
भिन्न ३	संगते दारिते भिन्नं भिन्नमन्यार्थकं विदुः ॥	५२१
विच्छिन्न २	समालब्धे विभक्ते च विच्छिन्नमभिधीयते ।	
विकट २	विशाले विकराले च विकटं कवयो विदुः ॥	५२२
स्वप्न २	स्वप्नः स्वापे च सुप्तस्य विज्ञाने च प्रयुज्यते ।	
निरस्त २	निष्ठ्यूते त्वरितोक्ते च निरस्तमभिधीयते ॥	५२३
ग्रस्त २	ग्रासीकृतं भवेद् ग्रस्तं ग्रस्तं लुप्तपदं वचः	
म्लिष्ट २	अविस्पष्टं वचो म्लिष्टं म्लानं म्लिष्टमुदाहृतम् ॥	५२४

सनातन २	सनातनः स्मृतो विष्णुः शाश्वतं च सनातनम् ।	
विश्वस्त १	विश्वासयोग्यो विश्वस्तो विश्वस्ता विधवा मता ॥ ५२५	विश्वस्ता १
गद २	गदा शस्त्रं गदो व्याधिर्गदो भ्राता च शार्ङ्गिणः ।	गदा १
प्लक्ष २	विज्ञेया पर्कटी प्लक्षः प्लक्षः पिप्पलपादपः ॥ ५२६	
शकुन २	शुभाशंसिनिमित्ते च खगे च शकुनं विदुः ।	
आभिनि-	विसर्जनीयाक्षरयोरभिनिष्ठान इष्यते ॥ ५२७	(ष्ठान २
संधिनी २	संधिन्यकालदुग्धा गौर्वृषाक्रान्ता च संधिनी ।	
कङ्कण ३	कङ्कणं मण्डणे सूत्रे कङ्कणं करभूषणम् ॥ ५२८	
पलाश ४	राक्षसे किंशुके पर्णे पलाशाख्या हरित्यपि ।	
प्रणिहित ३	न्यस्ते समाहिते प्राप्ते विदुः प्रणिहितं बुधाः ॥ ५२९	
सूद २	व्यञ्जने सूपकारे च सूदः सूपवदिष्यते ।	सूद २
संपद् २	गुणोत्कर्षे विभूतौ च संपदुक्ता मनीषिभिः ॥ ५३०	
अचल १	जानीयादचलां पृथ्वीमचलश्च महीधरः ।	अचला १
भोगवती २	नागानां नगरीनद्यौ भोगवत्यौ प्रकीर्तिते ॥ ५३१	
प्लवंगम २	प्लवंगमः कपौ भेके प्लवगोऽप्यनयोर्मतः ।	प्लवग २
संनिधि २	प्रत्यक्षे संनिधाने च संनिधिः पारिकीर्तितः ॥ ५३२	
उपाहित २	उपाहितोनलोत्पात आरोपित उपाहितः ।	
विवश २	विवशः स्यादवश्यात्मा विवशोऽरिष्टदुष्टधीः ॥ ५३३	
अधिक्षिप्त २	अधिक्षिप्तं प्रणिहिते भर्त्सिते च प्रयुज्यते ।	
अभाव २	अभावः स्यादसत्तायामभावो निधनार्थकः ॥ ५३४	
प्रज्ञा २	प्राज्ञी स्त्री भवति प्रज्ञा प्रज्ञा बुद्धिरुदाहृता ।	
आसार ३	आसारः स्यात्प्रसरणे वेगाद्वर्षे सुहृद्बले ॥ ५३५	
भूयस् २	पुनरर्थेऽव्ययं भूयो भूयान्बहुतरार्थकः ।	
परम २	अव्ययं स्यादनुज्ञाने परमं परमः परः ॥ ५३६	

उदास्थित	२	उदास्थितः प्रतीहारे चरभेदे च कीर्तितः ।
प्रतिमान	२	प्रतिमानं प्रतिच्छायागजदन्तान्तरालयोः ॥ ५३७
संख्य	१	एकत्वादौ विचारे च संख्या संख्यं च संयुगे । संख्या १
उद्घात	२	पादस्खलितमुद्घात उद्घातः समुपक्रमः ॥ ५३८
दिग्ध	२	विषलिप्तशरो दिग्धो दिग्धो लिप्तार्थवाचकः ।
प्रार्थित	२	प्रार्थितः प्रार्थनालब्धः प्रार्थितं च हतं विदुः ॥ ५३९
कुमुद	३	कुमुदं कैरवे ख्यातं कुमुदौ कपिदिग्गजौ ।
कोकनद	१	रक्ताब्जे रक्तकुमुदे बुधैः कोकनदं स्मृ(म)तम् ॥ ५४०
अनेडमूक	२	अनेडमूकमिच्छन्ति शठे वाक्श्रुतिवर्जिते ।
प्रवचनीय	२	प्रवक्तरि प्रवाच्ये च द्वयोः प्रवचनीयवाक् ॥ ५४१
मदन	४	मधूच्छिष्टे स्मरे वृक्षे वसन्ते मदनं विदुः ।
वामन	३	निखर्वे दिग्गजे विष्णौ वामनः परिकीर्तितः ॥ ५४२
अधिवास	२	अधिवासो निवासो स्यात्संस्कारे धूपनादिभिः ।
विहार	३	परिक्रमक्रीडनयोर्विहारः सुगतालये ॥ ५४३
आभिरूप	२	आभिरूपप्राप्तरूपस्वरूपा बुधरूपिणोः । (प्राप्तरूप २, स्वरूप २
कषाय	५	द्रवेङ्गरागे सुरभौ रसे वर्णे कषायवाक् ॥ ५४४
धर	२	धरा भूमिर्धरः शैलः कर्पासीतूलको धरः । धरा १
शुल्क	२	घट्टे शुल्कं विवाहार्थं जामातुर्गृह्यते च यत् ॥ ५४५
अवतार	२	तीर्थेवतरणे विद्यादवतारपदं बुधः ।
पुण्ड्र	३	इक्षुचित्रकयोः पुण्ड्रः पुण्ड्राञ्जनपदान्विदुः ॥ ५४६
श्रवण	३	नक्षत्रे श्रवणो ज्ञेयः श्रवणं श्रुतिकर्णयोः ।
सूतक	२	पारदाख्ये रसद्रव्ये जनने सूतकं मतम् ॥ ५४७
प्रासाद	२	देवाधिवासे प्रासादः प्रासादो नृपवेश्मनि ।
दुकूल	२	क्षौमे दुकूलमिच्छन्ति दुकूलं सूक्ष्मवाससि ॥ ५४८

राग	४	रागः क्लेशादिके रक्तौ मात्सर्ये लोहितादिषु ।	
मण्डल	३	समूहे मण्डलं बिम्बे देशे द्वादशराजके ॥ ५४९	
भास्	२	प्रभायां किरणे भासा सममंशुरुदाहृतः ।	अंशु २
सिक्थ	२	मधूच्छिष्टं स्मृतं सिक्थं सिक्थ ओदनसंभवः ॥ ५५०	
उत्पतन	२	ऊर्ध्वे गमनमुत्पात्तिर्द्वयमुत्पतनं मतम् ।	
तिक्त	२	शुभगन्धे रसे तिक्तस्तिक्ता स्यात्कटुरोहिणी ॥५५१	तिक्ता १
कल्माष	२	सितेतरः स्यात्कल्माषः कल्माषः कृष्णपाण्डुरः ।	
दम	२	दमो दण्डः समाख्यातो दम इन्द्रियनिग्रहः ॥ ५५२	
लेख	२	लेख्यदेवतयोर्लेखो लेखा राजिरुदाहृता ।	लेखा १
प्रविदारण	२	प्रविदारणमाख्यातं विद्वाद्भिर्दारणे रणे ॥ ५५३	
विष्कम्भ	२	विस्तारे प्रतिबन्धे(बिम्बे) च विष्कम्भः समुदाहृतः ।	
अवध्वस्त	३	समुज्झिते निन्दिते स्यादवध्वस्तोऽवचूर्णिते ॥ ५५४	
आपात	२	पतने क्व॰ तदात्वे च विदुरापातमुत्तमाः ।	
प्रवाह	२	प्रवाहशब्दमिच्छन्ति प्रवृत्तिजलवेगयोः ॥ ५५५	
आप्लुत	२	आप्लुतः स्नातको ज्ञेय आप्लुतः स्नातमात्रके ।	
आत्मयो-		आत्मयोनिर्मतो वेधा आत्मयोनिर्मनोभवः ॥ ५५६	(नि २
भूमि	२	पृथिव्यां स्थानमात्रे च भूमिर्भूरिव दृश्यते ।	भू २
गोप्य	२	गोपनीयं भवेद् गोप्यं गोप्या दासस्य सूनवः ॥ ५५७	
संस्कार	२	संस्कारशब्दमिच्छन्ति संकल्पप्रातियत्नयोः ।	
प्रवचन	२	विद्यात्प्रवचनं वेदे प्रकृष्टवचनं च यत् ॥ ५५८	
मञ्जुल	२	मञ्जुलो मधुरे ख्यातो जलरङ्कुपतत्त्रिणि ।	
आकर	२	आकरो निकरो ज्ञेय उत्पत्तिस्थानमाकरः ॥ ५५९	
रौहिणेय	२	रौहिणेयो बुधो ज्ञेयो रौहिणेयो हलायुधः ।	
संघर्ष	२	संघ(ह)र्षशब्दमिच्छन्ति स्पर्धायां घर्षणेपि च ॥ ५६०	

वालक	२	वालकं कटकं विद्यादङ्गुलीयं च वालकम् ।	
परायण	२	परायणमभीष्टं स्यात्तत्परश्च परायणः ॥ ५६१	
विद्रुम	२	समुद्रोत्थे प्रवालाख्ये रत्ने वृक्षे च विद्रुमः ।	
सहज	२	निसर्गे च सहोत्थे च सहजं पण्डिता विदुः ॥ ५६२	
प्रतिशिष्ट	२	प्रत्याख्याते प्रेषिते च प्रतिशिष्टपदं विदुः ।	
उपोढ	२	उपोढमूढमात्रेपि समासन्नेपि कीर्तितम् ॥ ५६३	
आक्षेप	२	आकर्षणं स्यादाक्षेपः स्यादाक्षेपश्च भर्त्सनम् ।	
साहस	२	बलात्कारकृतं कर्म साहसं साहसं दमः ॥ ५६४	
पित्सत्	२	पतनेच्छौ विहंगे च पित्सन् पिपातिषन्यथा ।	पिपातिषन् २
जिगीषा	२	जिगीषा जेतुमिच्छायां व्यवसाये च दृश्यते ॥ ५६५	
पशु	३	पशुर्मृगादौ छगले पशु दृश्यार्थमव्ययम् ।	
बहु	२	विपुले त्र्यादिसंख्यासु बहुशब्दः प्रयुज्यते ॥ ५६६	
आकलन	२	बन्धने कलनायां च विदुराकलनं बुधाः ।	
स्तनन	२	स्तननं क्रन्दनध्वाने ध्वानमात्रे च कीर्तितम् ॥ ५६७	
कञ्चुक	४	कवचे वारवाणे च निर्मोके चापि कञ्चुकः ।	
पूर्णपात्र	२	वर्धापके पूर्णपात्रं पात्रे पूर्णे जलादिना ॥ ५६८	
लक्ष्मी-		लक्ष्मीपतिर्वासुदेवे भूमिपालेच दृश्यते ।	(पति २
वैदेही	२	वैदेही पिप्पली प्रोक्ता वैदेही जनकात्मजा ॥ ५६९	
अभीक	२	अभिकामायिताऽभीकः स्यादभीको भयोज्झितः ।	
नत	२	नतं बन्धुरमिच्छन्ति नतं कुटिलवाचकम् ॥ ५७०	
ययु	२	ययुः स्यादश्वमेधाश्वो ययुरश्वोपि केवलः ।	
ताम्र	२	वर्णप्रभेदे शुल्वे च ताम्रशब्दं विदुर्बुधाः ॥ ५७१	
उषस्	२	उषसं ब्रुवते संध्यामुषः प्रत्यूषवाचकम् ।	
आग्रह	२	आग्रहोनुग्रहे दृष्ट आसक्तिग्रहयोस्तथा ॥ ५७२	

द्वीपवत् २	द्वीपवत्यः स्मृता नद्यौ द्वीपवानम्बुधौ नदे ।	द्वीपवती १
कुसीद २	कुसीदिकः कुसीदः स्यात्कुसीदं वृद्धिजीवनम् ॥ ५७३	
प्रतीक २	प्रतीकोवयवे ख्यातः प्रतीपेपि क्वचिन्मतः ।	
क्षिति २	क्षये निवासे मेदिन्यां क्षितिशब्दस्त्रिषु स्मृतः ॥ ५७४	
पिण्याक २	पिण्याकस्तिलकल्के च सिह्लकेपि प्रयुज्यते ।	
सोमवल्क २	कट्फले शुक्लखदिरे सोमवल्क उदाहृतः ॥ ५७५	
श्रीपर्ण २	श्रीपर्णमग्निमन्थाख्ये(ख्यं) पादपे कमलेपि च ।	
भूतिक ३	भूनिम्बे भूस्तृणे प्रोक्तं भूतिकं कत्तृणे तथा ॥ ५७६	
विधूत २	विधूतं कम्पिते त्यक्ते धूतमप्यनयोर्मतम् ।	धूत २
अवसित २	अवसानगते ज्ञाते विद्यादवसितध्वनिम् ॥ ५७७	
अवलेप २	गर्वलेपनयोरुक्तमवलेपपदं बुधैः ।	
क्षेप २	क्षेपणे चावहेले च क्षेपशब्दः प्रयुज्यते ॥ ५७८	
प्रतिपादन २	बोधने च प्रदाने च प्रतिपादनमिष्यते ।	
लूता २	लूताशब्दं विजानीयादूर्णनाभे पिपीलिके ॥ ५७९	
घोष ६	गोपपल्लौ स्वरे घोषो मेघादेरपि निस्वने ।	
नियम ४	यन्त्रणायां प्रतिज्ञायां नियमो निश्चये व्रते ॥ ५८०	
गिरि ४	गीर्णौ गिरियके(क-) क्रीडागुडके पर्वते गिरिः ।	
अण्डज ३	कृकलासः खगो मीनस्त्रयमण्डजसंज्ञकम् ॥ ५८१	
ब्राह्मण्य २	ब्राह्मण्यं ब्राह्मणत्वे च समूहे च द्विजन्मनाम् ।	
निकार २	निकारः परिभावे च धान्यस्योत्क्षेपणेपि च ॥ ५८२	
तर्क २	वितर्काकाङ्क्षयोस्तर्कस्तर्क ऊह उदाहृतः ।	
विजृम्भित २	विजृम्भितं विकासिते चेष्टायां च विजृम्भितम् ॥ ५८३	
विवर २	विवरच्छिद्ररन्ध्रादीनाहुर्दूषणगर्तयोः ।	(छिद्र २, रन्ध्र २
महाकाल ३	प्रयुञ्जते महाकालं किंपाके प्रमथेऽपि च (शिवे) ॥ ५८४	

अर ३ अरमङ्गे रथाङ्गस्य शीघ्रशीघ्रगयोरपि ।
उद्ग्राहित २ बद्धग्राहितयोरुक्तमुद्ग्राहितपदं बुधैः ॥ ५८५
दर्शक २ स्याद्दर्शको दर्शयिता प्रतीहारश्च दर्शकः ।
अन्तिक १ समीपमन्तिकं विद्यादन्तिकां चुल्लिकामपि ॥५८६ अन्तिका १
आवेशन २ स्यादावेशनमावेशे शालायामपि शिल्पिनाम् ।
आस्क- विदुरास्कन्दनं युद्धमास्कन्दं च विचक्षणाः ॥ ५८७ (न्दन २
चोद्य २ विस्मये चोदनार्हे च चोद्यमाहुर्मनीषिणः ।
विषाणिन् २ विषाणिनः स्युः करिणः शृङ्गिणश्च विषाणिनः ॥ ५८८
विश्लेष २ विश्लेषवदयोगः स्याद्वियोगे विधुरे तथा । अयोग २
गाण्डिव २ जिष्णोर्धनुषि कोदण्डे गाण्डीवं गाण्डिवं यथा॥५८९(गाण्डीव २
योग्य २ प्रवीणोपायिनौ योग्यौ योग्यामभ्यसनं विदुः । योग्या १
वर्णक २ विलेपने चन्दने च शब्दज्ञैर्वर्णकः स्मृतः ॥ ५९०
विश्रब्ध २ विश्रब्धशब्दमिच्छन्ति विश्वस्तानुद्भटार्थकम् ।
अश्वीय २ स्यादश्वहितमश्वीयमश्वीयं चाश्वसंहतिः ॥ ५९१
निषध ४ निषधः कठिने देशे तद्राजे पर्वतान्तरे ।
कश्य ३ कश्यं मद्ये कशार्हे च हयमध्ये च दृश्यते ॥ ५९२
दिष्टि २ आनन्दे परिमाणे च दिष्टिं बहुविदो विदुः ।
वर्ति ३ दीपे दीपदशायां च वर्तिर्गात्रानुलेपने ॥ ५९३
गुप्ति ३ गुप्तिः कारा च रक्षा च जी(दी)र्णे च विवरं भुवः॥ ५९४

विभक्तिप्रविभागेण नानारूपैरतः परम् ।
श्लोकपादैः प्रवक्ष्यन्ते शब्दाः श्रुतिसुखावहाः ।। ५९४

केशव २	केशवौ केशवत्कुणौ चाक्रिणौ सर्पशार्ङ्गिणौ ।	चाक्रिन् २
वेधस् २	वेधसौ हरिधातारौ विधू विष्णुनिशाकरौ ।। ५९५	विधु २
विवस्वत् २	देवसूर्यौ विवस्वन्तौ खगावादित्यपक्षिणौ ।	खग २
भानु २	भानू दीप्तिदिनकरौ प्रभुतिग्मरुचाविनौ ।। ५९६	इन २
वृषाकपि २	वृषाकपी विष्णुशिवौ भीमौ शिवभयानकौ ।	भीम २
स्वामिन् २	स्वामिनौ गुहभर्तारौ मरुतौ पवनामरौ ।। ५९७	मरुत २
मुण्ड २	मुण्डौ मुण्डितमूर्धानौ शारौ शबलमारुतौ ।	शार २
अनिमिष २	सुरमत्स्यावानिमिषौ सिद्धार्थौ बुद्धसर्षपौः ।। ५९८	सिद्धार्थ २
श्लोक २	श्लोकौ यशोवृत्तबन्धौ प्राणोद्योगौ पराक्रमौ ।	पराक्रम २
वल्लभ २	वल्लभौ दयिताध्यक्षौ मधुरौ स्वादुशोभनौ ।। ५९९	मधुर २
तार्क्ष्य २	तुरंगगरुडौ तार्क्ष्यौ ह्रादिन्यौ वज्रविद्युतौ ।	ह्रादिनी २
क्लीब २	षण्ढनिर्विक्रमौ क्लीबौ बुधौ ग्रहविचक्षणौ ।। ६००	बुध २
अब्द २	अब्दौ संवत्सराम्भोदौ शरदावृतुवत्सरौ ।	शरद २
शूल २	शूलौ प्रहरणामयौ पिशुनौ खलसूचकौ ।। ६०१	पिशुन २
प्रस्तर २	प्रस्तरौ मणिपाषाणौ ग्रावाणौ पर्वतोपलौ ।	ग्रावन् २
पोत २	यानपात्रशिशू पोतौ भृङ्गौ धूम्याटषट्पदौ ।। ६०२	भृङ्ग २
ऋक्ष २	ऋक्षौ नक्षत्रभल्लूकौ श्येनौ श्येतविहंगमौ ।	श्येन २
ध्वाङ्क्ष २	बालिपुष्टकौ ध्वाङ्क्षौ नीचमूर्खौ पृथग्जनौ ।।६०३	पृथग्जन २
वाजिन् २	वाजिनौ पक्षितुरगौ वृद्धौ स्थविरपण्डितौ ।	वृद्ध २
वार २	विसरावसरौ वारौ पाकौ पचनबालकौ ।। ६०४	पाक २
सित २	सितौ च बद्धधवलौ कुब्जौ च हनुगह्वरौ ।	कुब्ज २
मूढ २	मूढौ च तन्द्रितजडौ शिती च धवलासितौ ।। ६०५	मूढ २

बर्ह २	शिखिपिच्छदलौ बर्हौ बाणभृङ्गौ शिलीमुखौ ।	शिलीमुख २
भुजंग २	भुजंगौ पिङ्गभुजगौ शकुन्तौ भासपक्षिणौ ॥६०६	शकुन्त २
निवेश २	निवेशौ शिबिरोद्वाहौ जिह्मौ कुटिलमन्दकौ ।	जिह्म २
विश्व २	विश्वसंज्ञौ जगत्सर्वौ चित्रदर्पौ च विस्मयो ॥६०७	विस्मय २
हरिण २	हरिणौ पाण्डुरमृगौ जीमूतौ मेघपर्वतौ ।	जीमूत २
उपल २	उपलौ रत्नपाषाणौ बालिशौ मूर्खशावकौ ॥ ६०८	बालिश २
निपाक २	निपाकौ पचनस्वेदौ गेयौ गातव्यगायनौ ।	गेय २
गरुत्मत् २	पक्षितार्क्ष्यौ गरुत्मन्तौ प्राप्तौ लब्धसमञ्जसौ ॥ ६०९	प्राप्त २
पयोधर २	पयोधरौ स्त्रीस्तनाब्दौ संस्तरौ प्रस्तराध्वरौ ।	संस्तर २
आमिष २	आमिषौ पललोत्कोचौ कृषकौ फालकर्षकौ ॥ ६१०	कृषक २
दायाद २	सपिण्डपुत्रौ दायादौ मातङ्गौ श्वपचद्विपौ ।	मातङ्ग २
श्वशुर्य २,तुषा-	श्वशुर्यौ देवरश्या(स्या)लौ तुषारौ हिमशीकरौ ॥ ६११	(र २
जम्बुक २	जम्बुकौ क्रोष्टुवरुणौ स्पशौ प्रणिधिसंगरौ ।	स्पश २
नीलकण्ठ २	नीलकण्ठौ शिखिहरौ नरेन्द्रौ नृपवार्तिकौ ॥ ६१२	नरेन्द्र २
संभोग २	रतभोगौ च संभोगौ देहात्मानौ च पुद्गलौ ।	पुद्गल २
शिखण्ड २	शिखण्डौ च शिखाबर्हौ क्षेत्रज्ञौ चात्माशिक्षितौ॥६१३	क्षेत्रज्ञ २
जम्भ २	रदाभ्यवहृती जम्भौ संबाधौ योनिसंकटौ ।	संबाध २
स्फुट २	स्फुटौ व्याकोशविशदौ विकाशौ विजनस्फुटौ ॥ ६१४	स्फुट २
सेनानी २	सेनान्यौ गुहसेनापौ विगतौ वीतनिष्प्रभौ ।	विगत २
त्रास २	मणिदोषदरौ त्रासौ पार्ष्णिगप्रसभौ हठौ ॥ ६१५	हठ २
अर्घ २	पूजाप्रतिक्रियावर्घौ पिण्डौ पुद्गलगोलकौ ।	पिण्ड २
शाण २	मानभेदकषौ शाणौ भ्रातृव्यौ भ्रातृजद्विषौ ॥६१६	भ्रातृव्य २
आमोद २	प्रमोदगन्धावामोदौ स्थूलौ निष्प्रज्ञपीवरौ ।	स्थूल २
आभोग २	आभोगौ पूर्णतायत्नौ शक्रौ कुटजवासवौ ॥ ६१७	शक्र २

प्रतिघ २	प्रतिघौ रुट्प्रतीघातावादित्यौ देवभास्करौ ।	आदित्य २
सामज २	सामजौ गजसामोत्थौ देवौ सुरमहीभुजौ ॥ ६१८	देव २
अण्डीर २	अण्डीरौ शक्तपुरुषौ धीरौ मन्थरपाण्डितौ ।	धीर २
विस्तार २	विस्तारौ विस्तृतिस्तम्बवादृतौ सादरार्चितौ ॥ ६१९	आदृत २
मन्थ २	मन्थौ सात्त्वमन्थानौ वृषभौ वृषपुंगवौ ।	वृषभ २
संकीर्ण,मूर्च्छि-	संकीर्णौ निचिताशुद्धौ मूर्च्छितौ मूढसोच्छ्रयौ ॥ ६२०	(त २
धनपाति २	कुबेराढ्यौ धनपती एतावागतकर्बुरौ ।	एत २
ऊर्ज २	उत्साहकार्तिकावूर्जौ यक्षौ यक्षेशगुह्यकौ ॥ ६२१	यक्ष २
कोक २	चक्रवाकवृकौ कोकौ रक्षोवृक्षौ पलाशिनौ ।	पलाशिन् २
डिम्भ २	वैधेयबालकौ डिम्भौ राहूत्पातावुपप्लवौ ॥ ६२२	उपप्लव २
विशारद २	विशारदौ धृष्टबुधौ मिथुने युग्मदम्पती ।	मिथुन २
मैथुन २	मैथुने रतसंबन्धौ तालिमे तल्पकुट्टिमौ ॥ ६२३	तालिम २
सचिव २	मन्त्रिसहायौ सचिवौ नाशावज्ञे पराभवौ ।	पराभव २
आविद्ध २	आविद्धौ कुटिलक्षिप्तौ भर्तारौ स्वामिधारकौ ॥ ६२४	भर्तृ २
करट २	काकेभगण्डौ करटावुत्सेधौ वपुरुन्नती ।	उत्सेध २
दन्त २	दन्तौ रदाद्रिकटकावसुराशीविषावही ॥ ६२५	अहि २
अज ३	अजा विष्णुहरच्छागा बालिहस्तांशवः कराः ।	कर ३
अवि ३	अवयश्चाद्रिमेषार्का गोष्ठाध्वानिवहा व्रजाः ॥ ६२५	व्रज ३
वृत्र ३	ध्वान्तदैत्यारतो वृत्रा अद्रयोर्कागिरिद्रुमाः ।	अद्रि ३
वर्चस् ३	वर्चांसि रूपविड्भासो दन्तविप्राण्डजा द्विजाः ॥६२७	द्विज ३
गृह २	गृहा गेहं गृहा दाराः कुटो वेश्म कुटो घटः ।	कुट २
शस्त्र, पयस् २	शस्त्रं हेतिरयः शस्त्रं पयः क्षीरं पयोम्बु च (घृतम्) ॥ ६२८	
उस्र,उस्रा १	गभस्तिरुस्र उस्रा गौर्द्युतिः कान्तिर्द्युतिः प्रभा ।	द्युति २
उरस् १	उरो वक्ष उरः श्रेष्ठं ज्या मौर्वी ज्या वसुन्धरा ॥६२९	ज्या २

श्वेत २	श्वेतं रूप्यं सितः श्वेतस्तपा माघस्तपो व्रतम् ।	तपस् २
सूक्ष्म, नभ-	सूक्ष्मोणुः सूक्ष्ममध्यात्मं नभः खं श्रावणो नभाः ॥६३०	(स् २
वन २	वनं नीरं वनं सत्त्रं विषं क्ष्वेडो विषं जलम् ।	विष २
भर्मन् ,त्विष् २	भर्म हेम भृतिर्भर्म त्विषः शोभास्त्वि(त्वि)षो रुचः ॥ ६३१	
भीरु २	भीरु स्त्री कातरो भीरुर्घृतमाज्यं घृतं जलम् ।	घृत २
क्षीर २	क्षीरमम्बु पयः क्षीरमभ्रं व्योमाभ्रमम्बुदः ॥ ६३२	अभ्र २
मद २	मदो गर्वो मदो हर्षं ऋतं सत्यमृतं शिलम् ।	ऋत २
युत २	युतं पृथग्युतं युक्तं यतिः कारो यतिर्यती ॥ ६३३	यति २
कार २	कारो बलिर्यतिः कारो जलमम्बु जलो जडः ।	जल २
काव्य,सहस् २	काव्यं ग्रन्थो ग्रहः काव्यः सहा मासः सहो बलम् ॥ ६३४	
क्रोड २	वक्षः क्रोडः किरः क्रोडः शुषिः शोषः शुषिर्बिलम् ।	शुषि २
व्यक्त २	व्यक्तं स्फुटं बुधो व्यक्तश्चरश्चारश्चरश्चलः ॥ ६३५	चर २
सेव्य २	सेवार्होशीरियोः सेव्यं लभ्यं लब्धन्याययुक्तयोः ।	लभ्य २
शल्य २	शलाकाबाणयोः शल्यं स्वरुर्यूपाङ्गवज्रयोः ॥ ६३७	स्वरु २
चेल २	वस्त्रगर्हितयोश्चेलमशनिर्वज्रविद्युतोः ।	अशनि २
वृषाकपायी २	वृषाकपायी श्रीगौर्योरम्बिका मातृकोमयोः ॥ ६३७	अम्बिका २
हैमवती २	वचागौर्योर्हैमवती वर्जनं त्यागहिंसयोः ।	वर्जन २
अर्ति २	चापाग्रपीडयोरर्तिरतसीदुर्गयोरुमा ॥ ६३८	उमा २
लीला २	लीलाविलासक्रिययोर्विभ्रमो भ्रान्तिहावयोः ।	विभ्रम २
महिषी २	महिषी पशुराट्पत्न्योस्तन्द्री निद्राप्रमीलयोः ॥ ६३९	तन्द्री २
बन्ध २	आधिबन्धनयोर्बन्धः कार्यहेत्वोः प्रयोजनम् ।	प्रयोजन २
स्वेद २,सर-	घर्मस्वेदनयोः स्वेदः सरणिः पङ्क्तिमार्गयोः ॥ ६४०	(णि २
गणिका २	वेश्याकारिण्योर्गणिका स्यादर्हज्जिनपूज्ययोः ।	अर्हत् २
वज्र २	रत्नशक्रास्त्रयोर्वज्रं रङ्गसीसकयोस्त्रपुः ॥ ६४१	त्रपु २

लोक	२	जनविष्टपयोर्लोकः पवित्रं कुशपूतयोः ।	पवित्र २
व्यग्र	२	व्यापृताकुलयोर्व्यग्रः प्रजा संतानलोकयोः ॥ ६४२	प्रजा २
अनीक	२	अनीकं सैन्यमृधयोर्जीवातुर्जायुजीवयोः ।	जीवातु २
हेति	२	आयुधज्वालयोर्हेतिरार्चिर्ज्वालामयूखयोः ॥ ६४३	आर्चिस् २
रश्मि	२	रश्मिर्घृणिप्रग्रहयोर्भूरि प्राज्यसुवर्णयोः ।	भूरि २
प्रकाश	२	स्फुटभासोः प्रकाशः स्यान्महद्राज्यविशालयोः ॥६४४	महत् २
भाग	२	भाग्यैकदेशयोर्भागः सोम ओपधिचन्द्रयोः ।	सोम २
राशि	२	मेषादिपुञ्जयो राशिः सत्यं शपथतथ्ययोः ॥ ६४५	सत्य २
भव्य	२	योग्यकल्याणयोर्भव्यं हिमं शीततुषारयोः ।	हिम २
शुभ्र	२	शुक्लप्रदीप्तयोः शुभ्रं पलमुन्मानमांसयोः ॥६४६	पल २
प्रीति	२	प्रेमप्रमोदयोः प्रीतिर्धृतिर्धारणसौख्ययोः ।	धृति २
इष्टि	२	इष्टिर्यागेच्छयोरुक्ता भृतिर्भरणमूल्ययोः ॥ ६४७	भृति २
कृत	२	कृतं पर्याप्तयुगयोः क्रव्यान्मांसाशिरक्षसोः ।	क्रव्याद् २
न्यग्रोध	२	न्यग्रोधो व्यामवटयोर्विन्दुर्वेदितृविप्रुषोः ॥ ६४८	विन्दु २
अङ्क	२	उत्सङ्गलक्ष्मणोरङ्कश्चर्म स्यात्फलकत्वचोः ।	चर्मन् २
मोह	२	अविद्यामूर्च्छयोर्मोहश्चिकुरश्चलकेशयोः ॥ ६४९	चिकुर २
ग्राह	२	ग्रहावहारयोर्ग्राहश्चोक्षो गीतमनोज्ञयोः ।	चोक्ष २
भेल	२	प्लवभीलुकयोर्भेलः कीलालमसृगम्बुनोः ॥ ६५०	कीलाल २
दस्यु	२	रिपुतस्करयोर्दस्युर्मतिरिच्छामनीषयोः ।	मति २
रण	२	रणः स्यात्क्वाणमृधयोर्लवश्छेदनलेशयोः ॥ ६५१	लव २
मर्यादा	२	मर्यादा धारणासीम्नोरिज्या यजनपूजयोः ।	इज्या २
विरुध्	२	लताविटपयोर्विरुज्जयन्तीदुर्गयोर्जया ॥ ६५२	वपा २
भित्ति	२	प्रदेशकुड्ययोर्भित्तिर्वपा विवरमेदसोः ।	जया २
सती	२	सती हैमवतीसाध्व्योर्मूल्यं वेतनवस्नयोः ॥ ६५३	मूल्य २

लङ्का २	नगरीशाखयोर्लङ्का प्रसूनं फलपुष्पयोः ।	प्रसून २
रत्न २	मणिप्रकृष्टयो रत्नं प्रतिपत्तिथिसंविदोः ॥ ६५४	प्रतिपद् २
चिह्न २	पताकालक्ष्मणोश्चिह्नं गैरिकं धातुरुक्मयोः ।	गैरिक २
व्रज्या २	वर्गप्रस्थानयोर्व्रज्या वाहिनी सिन्धुसेनयोः ॥ ६५५	वाहिनी २
अर्वन् २	अश्वकुत्सितयोरर्वा गह्वरं बिलदम्भयोः ।	गह्वर २
बाष्प २	ऊष्मनेत्राम्भसोर्बाष्पः प्रेम स्निग्धत्वनर्मणोः ॥ ६५६	प्रेमन् २
निन्दा २	कुत्सापवादयोर्निन्दा सुतः पुत्रमहीभुजोः ।	सुत २
शास्त्र २	निदेशागमयोः शास्त्रं प्रवेणीकुशयोः कुथः ॥ ६५७	कुथ २
त्वक् २	त्वक्चर्मवल्कयोरुक्ता सदृशव्याजयोर्निभः ।	निभ २
डिम्ब २	प्लीहविप्लवयोर्डिम्बः शुद्धः केवलपूतयोः ॥ ६५८	शुद्ध २
सामिधेनी २	ऋक्समिधोः सामिधेनी लक्षणं नामचिह्नयोः ।	लक्षण २
शान्ति २, कान्ति २	कल्याणशमयोः शान्तिः कान्तिः शोभेच्छयोः स्मृता ॥ ६५९	
योनि २	आकरोपस्थयोर्योनिरोघो वृन्दाम्बुवेगयोः ।	ओघ २
स्वैर २	मन्दस्वच्छन्दयो स्वैरो योग्यपण्डितयोः कृती ॥ ६६०	कृतिन् २
वृष्णि २	मेषयादवयोर्वृष्णिर्विलग्नो मध्यलग्नयोः ।	विलग्न २
शाद २	शष्पकर्दमयोः शादो द्रोणो वायसमानयोः ॥ ६६१	द्रोण २
वसति २	वसतिर्वेश्मयामिन्योः क्षवथुः क्षुतकासयोः ।	क्षवथु २
प्रतीहार २	द्वाःस्थद्वारोः प्रतीहार; सायकः शरखड्गयोः ॥ ६२२	सायक २
शङ्का २	वितर्कत्रासयोः शङ्का बन्धनं वृत्तबन्धयोः ।	बन्धन २
रूक्ष २	परुषास्निग्धयो रूक्षः कोमलातिग्मयोर्मृदुः ॥ ६६३	मृदु २
अन्त्य २	अधमान्तभुवोरन्त्यो वाडवो ब्राह्मणौर्वयोः ।	वाडव २
घृणा २	घृणा जुगुप्साकृपयोरवटः कूपगर्तयोः । ६६४	अवट २
ऊति २	स्यूतिरक्षणयोरूतिः सातिर्दानावसानयोः ।	साति २
सेवन २	सेवनं सीवनोपास्त्योर्द्रुतं शीघ्रविलीनयोः ॥ ६६५	द्रुत २

सव्य	२	वामदक्षिणयोः सव्यमधमो न्यूनगर्ह्ययोः ।	अधम	२
प्रेक्षा	२	धीनृत्यदर्शयोः प्रेक्षा मूर्तिः काठिन्यकाययोः ॥ ६६६	मूर्ति	२
यात्रा	२	वृत्तिप्रस्थानयोर्यात्रा धनं गोधनवित्तयोः ।	धन	२
अर्चा	२	प्रतिमापूजयोरर्चा मह् उत्सवतेजसोः ॥ ६६७	महस्	२
आप्ति	२	प्राप्तिसंबन्धयोराप्तिर्लक्ष्म चिह्नप्रधानयोः ।	लक्ष्मन्	२
		(… … … लक्ष्मचिह्नप्रधानयोः ।)		
चित्र	२	नवेऽ(?)विचारिते चित्रं वदान्यो दातृवाग्मिनोः ।	वदान्य	२
हिंसा	२	चौर्यादिवधयोर्हिंसा जामिः स्वसृकुलस्त्रियोः ॥ ६६८	जामि	२
लेप	२	जग्धिलेपनयोर्लेपः स्यादन्नं भक्तभुक्तयोः ।	अन्न	२
विद्वस्	२	विद्वान् विदत्पण्डितयोर्गोपतिः षण्डसूर्ययोः ॥ ६६९	गोपति	२
श्रद्धा	२	श्राद्धत्वकाङ्क्षयोः श्रद्धा भूतिः संपत्तिभस्मनोः ।	भूति	२
बाधा	२	निषेधदुःखयोर्बाधा क्षुल्लकः पामराल्पयोः ॥ ६७०	क्षुल्लक	२
करेणु	२	करेणुर्गजहस्तिन्योर्वर्तनी वृत्तिमार्गयोः ।	वर्तनी	२
व्रतति	२	विस्तारवल्ल्योर्व्रततिराकृतिः कायरूपयोः ॥ ६७१	आकृति	२
स्नेह	२	स्नेहस्तैलादिकप्रेम्णोरक्षरं ब्रह्मवर्णयोः ।	अक्षर	२
कर्षू	१	कर्षूर्नदीकरीषाग्न्योर्भरोतिशयभारयोः ॥ ६७२	भर	२
गुह्य	२	उपस्थरहसोर्गुह्यमनूकं कुलशीलयोः ।	अनूक	२
राष्ट्र	२	विषयोत्पातयो राष्ट्रमागः पापापराधयोः ॥ ६७३	आगस्	२
मध्य	२	न्याय्यावलग्नयोर्मध्यं चर्चा स्थासकचिन्तयोः ।	चर्चा	२
रथ्या	२	रथौघमार्गयो रथ्या मृत्युयाचितयोर्मृतम् ॥ ६७४	मृत	२
स्रोतस्	२	स्रोतोम्बुवेगेन्द्रिययोश्छद्मस्खलितयोश्छलम् ।	छल	२
अट्ट	२	अत्यर्थगृहयोरट्टः प्रस्थः स्यात्सानुमानयोः ॥ ६७५	प्रस्थ	२
अन्य	२	इतरासदृशोरन्य उडुपश्चन्द्रभेलयोः ।	उडुप	२
छन्द	२	छन्दोभिप्रायवशयोः संस्था स्थितिविनाशयोः ॥ ६७६	संस्था	२

वीचि २	स्वल्पकल्लोलयोर्वीचिरहिर्भुक्किताक्ष्र्ययोः ।	अहिभुज् २
द्विजिह्व २	द्विजिह्वः सर्पखलयोर्निजमात्मीयानित्ययोः ॥ ६७७	निज २
क्षोद २	धूलिपेषणयोः क्षोदो रभसो वेगहर्षयोः ।	रभस २
पल्लि २	कुटीग्रामकयोः पल्लिः सखा मित्रसहाययोः ॥ ६७८	सखि २
व्यूढ २	विन्यस्ते संहते व्यूढश्चारो बन्धापसर्पयोः ।	चार २
आशुग २	आशुगो मारुते बाणे वैशाखो मासमन्थयोः। ६७९	वैशाख २
आशा २	आशा ककुभि तृष्णायां स्वादुर्मृष्टमनोज्ञयोः ।	स्वादु २
मार्गण २	मार्गणो याचके बाणे जातं जन्मसमूहयोः ॥ ६८०	जात २
नियति २	नियतिः संयमे दैवे प्रकारस्तुल्यभेदयोः ।	प्रकार २
व्यवाय २	व्यवायः सुरतेऽन्तर्धौ धन्वपर्वतयोर्मरुः ॥ ६८१	मरु २
कुम्भ २	गजाङ्गे कलशे कुम्भः पताकाचिह्नयोर्ध्वजः ।	ध्वज २
भ्रूण २	भ्रूणोऽर्भके स्त्रैणगर्भे प्रियङ्गुः कङ्गुवृक्षयोः ॥६८२	प्रियङ्गु२
आकल्प २	आकल्पः कल्पने वेषे निस्त्रिंशः क्रूरखड्गयोः ।	निस्त्रिंश २
संप्रयोग २	रतेन्वितौ संप्रयोगः कलङ्कोङ्कापवादयोः ॥ ६८३	कलङ्क २
प्राप्ति २	उदयेऽधिगमे प्राप्तिः क्षारः स्यात्काचभस्मनोः ।	क्षार २
वह २	वहो वाहे गवां स्कन्धे पद्धतिः पङ्क्तिवर्त्मनोः॥६८४	पद्धति२
शल्क २	वल्कले शकले शल्कं प्रगाढं दृढकृच्छ्रयोः ।	प्रगाढ २
स्वभू २	स्वभूर्वेधासि गोविन्दे शुक्तं स्यात्परुपाम्लयोः ॥ ६८५	शुक्त २
क्षुण्ण २	व्युत्पन्ने प्रहते क्षुण्णो निशान्तं गेहशान्तयोः ।	निशान्त २
गोधा २	गोधा तले निहाकायां विभुः स्यात्प्रभुनित्ययोः॥ ६८६	विभु२
त्रयी २	त्रयी त्रिवेद्यां त्रितये निषङ्गः सङ्गतूणयोः ।	निषङ्ग २
भ्रमर२,भूता-	भ्रमरः कामुके भृङ्गे भूतात्मा धातृदेहयोः ॥ ६८७	(त्मन् २
द्रुम २	द्रुमस्तरौ पारिजाते भाण्डहव्यान्नयोश्चरुः ।	चरु २
कराल २	करालो दन्तुरे तुङ्गे न्यक्षं कार्त्स्न्यनिकृष्टयोः ॥ ६८८	न्यक्ष२

अदस् २	अदः परस्मिन्नत्रापि व्यूहो विन्यासवृन्दयोः ।	व्यूह २
स्तिमित २	स्तिमितोऽतरले क्लिन्ने कष्टं गहनकृच्छ्रयोः ॥ ६८९	कष्ट २
विकार २	विकारो विकृतौ रोगे विरोधो नाशरोधयोः ।	विरोध २
संरोध २	क्षेपे रोधे च संरोधो गाथा वाग्भेदवृत्तयोः ॥ ६९०	गाथा २
विशद २	प्रव्यक्ते विशदः शुक्ले निधनं कुलनाशयोः ।	निधन २
अर्घ्य २	अर्घ्यो विपाश्चिति न्याय्ये बल्लवो गोपसूदयोः ॥ ६९१	बल्लव २
पल्लव २	पल्लवो विटपे पिङ्गे किट्टकिल्बिषयोर्मलम् ।	मल २
पीति २	पीतिस्तुरंगमे पाने वित्तं द्रव्यप्रकाशयोः ॥ ६९२	वित्त २
धेनुका २	करिण्यां धेनुका धेनौ हेलावज्ञाविलासयोः ।	हेला २
दुर्गति,क्रिमि२	दुर्गतिर्नरके नैःस्व्ये क्रि(कृ)मिः स्यात्कीटलाक्षयोः ॥ ६९३	
वृत्ति २	वर्तने विवृतौ वृत्तिस्तरः स्याद्बलवेगयोः ।	तरस् २
जनपद २	देशे जने जनपदः प्रवृत्तिर्वृत्तिवार्त्तयोः ॥ ६९४	प्रवृत्ति २
शाखा २	शाखा भुजे पादपाङ्गे लुब्धो मृगयुकाङ्क्षिणोः ।	लुब्ध २
समाघात २	समाघातो वधे युद्धे धावनं गतिशौचयोः ॥ ६९५	धावन २
व्युष्टि २	व्युष्टिः फले समृद्धौ च यानं गमनयुग्ययोः ।	यान २
स्नान २	स्नानीये सवने स्नानं सैन्धवो लवणाश्वयोः ॥ ६९६	सैन्धव २
वर्धन २	वर्धनं छेदने वृद्धौ रहः सुरतगुह्ययोः ।	रहस् २
वीर २	उत्तमे सुभटे वीरः प्रज्ञानं बुद्धिचिह्नयोः ॥ ६९७	प्रज्ञान २
कर्बुर २	किर्मिरे कर्बुरं हेम्नि गाङ्गेयं गाङ्गरुक्मयोः ।	गाङ्गेय २
पूग २	समूहे पादपे पूगः शूकोऽनुक्रोशशुङ्गयोः ॥ ६९८	शूक २
अभीषु २	अभीषुः(शुः) प्रग्रहे भासि बर्हिर्दर्भहुताशयोः ।	बर्हि २
अर्य२,निकृति२	अर्यः स्वामिनि वैश्ये च निकृतिः शठशाठ्ययोः ॥ ६९९	
पक्ति २	पक्तिः स्याद् गौरवे पाके रतिः सुरतरागयोः ।	रति २
नर २	नरः स्यादर्जुने मर्त्ये नालीकश्च शराब्जयोः ॥ ७००	नालीक २

दुर्वर्ण २	रूप्ये कुवर्णे दुर्वर्णमाभीलं भीष्मकृच्छ्रयोः ।	आभील २
खर्जूर २, वाशि-	फले रूप्ये च खर्जूरं वाशिता करिणीस्त्रियोः ॥ ७०१	(ता २
अनृत २	अनृतं कृपावसत्ये तक्षकस्तक्षनागयोः ।	तक्षक २
वेश २	वेश्यावासे गृहे वेशो भास्वान्भास्वरसूर्ययोः ॥ ७०२	भास्वन् २
हृदय २	हृदयं वक्षसि स्वान्ते पुरुषो मानवात्मनोः ।	पुरुष २
कलित २	ज्ञाते गृहीते कलित ईहा स्यादुद्यमेच्छयोः ॥ ७०३	ईहा २
अर्ध २	खण्डेऽर्धः समभागेऽर्धं प्रदोषो दोषकालयोः ।	प्रदोष २
मित्र २, समु-	मित्रं सुहृदि मित्रोऽर्के वैरोन्नत्योः समुच्छ्रयः ॥ ७०४	च्छ्रय २
रोक २	दीप्तौ रोको बिले रोकं नाकः स्वर्गान्तरिक्षयोः ।	नाक २
दल २	दलं खण्डे दलं पत्रे पुष्पमार्तवसूनयोः ॥ ७०५	पुष्प २
संव्यान २	संव्यानं छादने वस्त्रे भरणं वेतने भृतौ ।	भरण २
कञ्चुकिन् २	स्थापत्ये कञ्चुकी सर्पे वेल्लितं कुटिले धुते ॥ ७०६	वेल्लित २
त्रेता २	वह्नित्रये युगे त्रेता रैशब्दः कनके धने ।	रै २
चित्रक २	ओषधौ चित्रको व्याघ्रे पलाशे गरुतिच्छदः ॥ ७०७	छद २
रिष्ट २	रिष्टं स्यादशुभे पापे शस्ताकारे तनौ वपुः ।	वपुस् २
स्तम्भ २	स्तम्भो जडत्वे स्थूणायां निर्यासे नर्मणि द्रवः ॥ ७०८	द्रव २
शील २	शीलं स्वभावे सद्वृत्ते छले द्यूते च कैतवम् ।	कैतव २
उत्कट २, कील २	उत्कटः प्रबले क्षीबे स्थाणौ ज्वाले च कीलवाक् ॥ ७०९	
उदर्चिस् २	उदर्चिरुत्प्रभे वह्नौ पुरं स्यान्नगरे गृहे ।	पुर २
वृद्धि २	आनन्दे वर्धने वृद्धिः कृष्टिराकर्षणे बुधे ॥ ७१०	कृष्टि २
जघन्यज २	जघन्यजोऽनुजे शूद्रे शालपर्ण्यां भुवि स्थिरा ।	स्थिरा २
तृणता २	तृणत्वे तृणता चापे कारुः शिल्पिनि कारके ॥ ७११	कारु २
अण्ड २	मुष्के खगादिकोशेऽण्डं द्वापरः संशये युगे ।	द्वापर २
भक्ति २	विभागे सेवने भक्तिस्तरणिर्नावि भास्करे ॥ ७१२	तरणि २

एनस् २	एनोपराधे दुरिते वरेण्ये पुंगवो वृषे ।	पुङ्गव २
पूज्य २	पूजार्हे श्वशुरे पूज्यो हृषीके रेतसीन्द्रियम् ॥ ७१३	इन्द्रिय २
आनक २	आनकः पटहे भेर्यां मन्दिरं नगरे गृहे ।	मन्दिर २
इतर २	इतरः पामरेऽन्यस्मिन्दक्षे चारौ च पेशलः ॥ ७१४	पेशल २
वर्त्मन् २	वर्त्म नेत्रच्छदे मार्गे प्रोक्षणं सेचने वधे ।	प्रोक्षण २
कारण २	कारणं घातने हेतावश्वायां मातरिः प्रसूः ॥ ७१५	प्रसू २
त्रिदिव २	स्वर्गेन्तारिक्षे त्रिदिवं दानं गजमदे दितौ ।	दान २
हविस् २	हविः सर्पिषि होतव्ये मल्लः पात्रे बलीयसी ॥ ७१६	मल्ल २
उपस्थ २	उपस्थः शिश्न उत्सङ्गे कुब्जे पृष्टगुडे गडुः ।	गडु २
यन्तृ २	यन्ता हस्तिपके सूते गूथे तुद्योप्यवस्करः ॥ ७१७	अवस्कर २
खड्ग २	निस्त्रिंशे गण्डके खड्गः प्रणिधिः प्रार्थने चरे ।	प्रणिधि २
वञ्चुक २	वञ्चुको जम्बुके धूर्ते दुर्विधो दुर्गते खले ॥ ७१८	दुर्विध २
ऋषि २	ऋषिर्वेदे वसिष्ठादौ गिरीशोऽद्रिपतौ शिवे ।	गिरीश २
अस्त्र २	अस्त्रं स्यादायुधे चापे कदम्बाख्या द्रुमे चये॥ ७१९	कदम्ब २
कबन्ध २	कबन्धं सलिले रुण्डे क्रन्दे रोदनमश्रुणि ।	रोदन २
नलिनी २	पद्माकरेब्जे नलिनी कुहरं गह्वरे बिले ॥ ७२०	कुहर २
चूडा २	शिखायां वलभौ चूडा छदनं गरुतिच्छदे ।	छदन २
चिति २	चितिः समूहे चित्यायां गमने पद्धतौ सृतिः ॥ ७२१	सृति २
स्थूणा २, रोहि-	स्थूणा स्तम्भेथ(म्भे च) सूर्म्यां च नक्षत्रे गावि रोहिणी ।	(णी २
षण्ड २	षण्डो वने गवां पत्यौ तिग्मे स्याद् गर्दभे खरः ॥ ७२२	खर २
वराङ्ग २	वराङ्गं मस्तके योनौ कूपीटमुदरे जले ।	कूपीट २
तोदन २	तोदनं व्यथने तोत्त्रे कृत्ये स्यादास्पदं पदे ॥ ७२३	आस्पद १
भूभृत् २	भूभृद्गिरौ महीपाले वधे दानेतिसर्जनम् ।	अतिसर्जन २
निमित्त २	निमित्तं लक्षणे हेतौ जीवनं वर्तनेम्भसि ॥ ७२४	जीवन २

कलुष २	आविले कलुषं पापे शय्यायां शयनं रते ।	शयन २
शासन २	शास्त्रे शासनमाज्ञायां गह्वरे गहनं वने ॥ ७५५	गहन २
अवन २	अवनं रक्षणे तृप्तौ लिप्तं भुक्ते विलिप्तके ।	लिप्त २
उपित २	व्युषिते दग्ध उपितमुदितं प्रोक्त उद्गते ॥ ७२६	उदित २
शाप २	आक्रोशे शपथे शापस्तरुणो यूनि नूतने ।	तरुण २
छन्न २	छादिते रहसिच्छन्नं भुवनं विष्टपे जने ॥ ७२७	भुवन २
शय्या २	शय्या तल्पे ग्रन्थगुम्फे पर्णाख्या किंशुके छदे ।	पर्ण २
मूल २	मूलमाद्ये शिफायां च कान्तारं प्रान्तरे वने ॥ ७२८	कान्तार २
भावित २	भावितं वासिते लब्धे चुल्ल्यामुद्धा(द्धा)नमुद्गते(मे) ।	उद्धान २
तालिन २	स्वच्छे तालिनमल्पे स्यादर्दितं प्रार्थिते हते ॥ ७२९	आर्दित २
भ्रम २	भ्रमोम्बुनिर्गमे भ्रान्तौ पूर्द्वारि द्वारि गोपुरम् ।	गोपुर २
प्रसर २	प्रसरः प्रणये वेगे वर्तको श्वखुरे खगे ॥ ७३०	वर्तक २
निःश्रेयस २	निःश्रेयसं शिवे मोक्षे दिवौकाश्चातके सुरे ।	दिवौकस् २
आजि २	आजिः समावनौ युद्धे पर्यायोऽवसरे क्रमे ॥ ७३१	पर्याय २
प्रैष २	पीडने प्रेषणे प्रैषः कलिरन्त्ययुगे रणे ।	कलि २
प्रवेणी २, दिष्ट-	कुथे प्रवेणी वेण्यां च काले दैवे च दिष्टवाक् ॥ ७३२	(वाक्
आलोक २	आलोको दर्शने द्योते विन्नं लब्धे विचारिते ।	विन्न २
शंसा २	वाञ्छायां वचने शंसा वह्नौ पार्थे धनंजयः ॥ ७३३	धनंजय २
पङ्क २	कर्दमे कल्मषे पङ्कं भङ्गे रोगे रुजा मता ।	रुजा २
शकल २	शकलं वल्कले खण्डे व्यायतो व्यापृते दृढे ॥ ७३४	व्यायत २

अपिशब्देन साध्यन्ते पूर्वाचार्यानुसारतः ।
विस्मृता ये प्रमादेन कथ्यन्ते तेऽधुना पुनः ॥ ७३५

मन्द १	मन्दो हस्तिविशेषेपि घर्मः स्यादातपेपि च ।	घर्म १
उपस्पर्शन १	स्पर्शेप्युपस्पर्शनं स्यात्करो मेघोपलेपि च ॥ ७३६	कर १

वश	१	स्यादिच्छायामपि वशश्चाण्डालेपि प्लवो मतः ।	प्लव १
प्रसव	१	प्रसवः स्यादपत्येपि वरणेपि वरः स्मृता ॥ ७३७	वर १
अन्तर	१	अन्तरं परिधानेपि बृहती वाच्यपि स्मृता ।	बृहती १
अङ्क	१	अङ्कं विदुः समीपेपि वेला कूलेपि वारिधेः ॥ ७३८	वेला १
सूचना	१	सूचना दर्शनेपि स्यात्पिण्डमाजीवनेपि च ।	पिण्ड १
वेधस्	१	विदुष्यपि स्मृतो वेधाश्चिकुरः पादपेपि च ॥ ७३९	चिकुर १
वाल	१	वालः स्यादश्वपुच्छेपि क्वचित्कोपेपि मत्सरः ।	मत्सर १
आधि	१	आधिर्मानसपीडापि तिलकं क्लोम्न्यपि स्मृतम् ॥ ७४०	तिलक १
सुरभि	१	सुरभिः स्यान्मनोज्ञेपि तारः शुद्धेपि मौक्तिके ।	तार १
दान	१	खण्डनेपि मतं दानं खगः काण्डेपि दृश्यते ॥ ७४१	खग १
रोहित	१	ऋश्येपि रोहितः प्रोक्तः प्रजानाथेप्यजः स्मृतः ।	अज १
गोकर्ण	१	गोकर्णो मृगभेदेपि मूलं स्यादन्तिकेपि च ॥ ७४२	मूल १
भद्रा	१	रास्नाख्यामपि भद्रा स्याच्छालपर्ण्यामपि ध्रुवा ।	ध्रुवा १
लता	१	लता स्यादतिमुक्तेपि शेषः सीरिण्यपि स्मृतः ॥ ७४३	शेष १
क्षार	१	क्षारो रसविशेषेपि मतं स्वप्नेपि दर्शनम् ।	दर्शन १
नाभि	१	नाभिश्चक्रस्य मध्येपि ग्रामो गीतस्वरेपि च ॥ ७४४	ग्राम १
वृष	१	वृषः स्यात्पुंविशेषेपि याच्ञायामपि मार्गणम् ।	मार्गण १
स्थान	१	सादृश्येपि क्वचित्स्थानं विद्वानप्यात्मवेदिनि ॥ ७४५	विद्वस् १
वान	१	वानं विशुष्कमात्रेपि भव्यं भाविन्यपि स्मृतम् ।	भव्य १
शाखा	१	शाखा वेदविभागेपि मध्यं स्यादन्तरेपि च ॥ ७४६	मध्य १
ऋषभ	१	ऋषभो गेयभेदेपि तेजो दीप्तावपि स्मृतम् ।	तेजस् १
चार	१	चारः पि(प्रि)यालवृक्षेपि मतं पत्रेपि पल्लवम् ॥ ७४७	पल्लव १
वार्त्ता	१	वार्त्ताकेपि क्वचिद् वार्त्ता स्फुटो व्याप्तेपि च क्वचित् ।	स्फुट १
पात्र	१	पात्रं स्रुगादिकेपि स्यात्कायः संघेपि दृश्यते ॥ ७४८	काय १

भव १	कल्याणेपि भवः प्रोक्तो दीर्घत्वेप्यायतिं विदुः ।	आयति १
घन १	विस्तारेपि घनं विद्यादनन्तः केशवेपि च ॥ ७४९	अनन्त १
तन्त्र १	तन्त्रं कुटुम्बकृत्येपि प्रधानं प्रकृतावपि ।	प्रधान १
कदली १	कदली मृगभेदेपि कर्कशः कठिनेपि च ॥ ७५०	कर्कश १
पण १	पणः स्याद् व्यवहारेपि ग्रामणीर्भोगिकेपि च ।	ग्रामणी १
प्रतिपत्ति १	बोधेपि प्रतिपत्तिः स्याद्धैर्येपि धृतिरिष्यते ॥ ७५१	धृति १
जाल १	कोरकेपि मतं जालं महेपि स्मृत उत्सवः ।	उत्सव १
परीवाप १	आवापेपि परीवापो हेतिर्भास्करभास्यपि ॥ ७५२	हेति १
सत्त्व १	मनस्यपि मतं सत्त्वं विद्यादिष्टं क्रतावपि ।	इष्ट १
कोश १	कोशः पात्रविशेषेपि संतानेपि परंपरा ॥ ७५३	परंपरा १
चर्चा १	देव्यामपि भवेच्चर्चा विशाखेपि गुहः स्मृतः ।	गुह १
रति १	रतिः स्मरकलत्रेपि धीरः स्याद्धैर्यवत्यपि ॥ ७५४	धीर १
वडवा १	वडवा स्त्रीविशेषेपि निकुञ्जेपि च गह्वरः ।	गह्वर १
काली१,भीम१	क्षीरकीटेपि काली स्याद् भीमः पाण्डुसुतेपि च ॥ ७५५	
शारि १	शारिः पर्याणभेदेपि व्यूढः स्यात्पृथुलेपि च ।	व्यूढ १
भाव१,वाजि-	भावो रसनिमित्तेपि वाजी स्याद्विशिखेपि च ॥ ७५६	(न् १
कला १	कलावयवमात्रेपि संस्था स्यात्प्रणिधावपि ।	संस्था १
करक १	करकः स्यात्करङ्केपि पुरं देहेपि दृश्यते ॥ ७५७	पुर १
करट १	करटो दुर्दुरूटेपि द्रोणोर्जुनगुरावपि ।	द्रोण १
युग १	युगं हस्तचतुष्केपि दीर्घेपि व्यायतं विदुः ॥ ७५८	व्यायत १
चरण १	बह्वृचाद्येपि चरणो मदो बीजेपि देहिनाम् ।	मद १
रथ्य १	रथोद्वहेपि रथ्यः स्यादलंकारेपि वालिका ॥ ७६९	वालिका १
शुक्ति १	अश्वावर्तेपि शुक्तिः स्याद् भ्रमः कुन्देपि दृश्यते ।	भ्रम १
पद्म १	पद्मो व्यूहविशेषेपि धर्म चापेपि कीर्तितम् ॥ ७६०	धर्म १

रीति	१	प्रचारेपि स्मृता रीतिः काण्डः स्कन्धेपि शाखिनाम् ।	काण्ड १
ग्रहण	१	सोमग्रहेपि ग्रहणं सुधा लेपेपि दृश्यते ॥ ७६१	सुधा १
कटु	१	कटुः शोभनगन्धेपि वसतिश्च स्थितावपि ।	वसति १
भौण्ड	१	भाण्डं भूषणमात्रेपि सूनं स्यात्पुष्पितेपि च ॥ ७६२	सून १
स्नेह	१	सौहार्देपि मतः स्नेहो जन्यः स्याज्जनकेपि च ।	जन्य १
धर्मराज	१	धर्मराजः पाण्डवेपि रामो दाशरथावपि ॥ ७६३	राम १
जम्भ	१	जम्भो दैत्यविशेषेपि कुल्यः स्यात्कुलजेपि च ।	कुल्य १
पटल	१	पटलं पिटकेपि स्यात्केवलेपि परं मतम् ॥ ७६४	पर १
स्कन्ध	१	स्कन्धस्तरुप्रकाण्डेपि कुलं गेहेपि दृश्यते ।	कुल १
पर्जन्य	१	मेघध्वानेपि पर्जन्यो मधुरेपि वसुः स्मृतः ॥ ७६५	वसु १
कीला	१	कीला कफो(फ)णिभागेपि वर्चस्केपि मलं मतम् ।	मल १
प्रसूति	१	उत्पादेपि प्रसूतिः स्यात्पारंपर्येपि संततिः ॥ ७६६	संतति
शाला	१	शाला गृहैकदेशेपि धवलो गोवृषेपि च ।	धवल १
परुष	१	परुषं रूक्षमात्रेपि शरेपि विशिखः स्मृतः ॥ ७६७	विशिख१
कषाय	१	क्वाचित्कषायं रक्तेपि लघु स्यादगुरुण्यपि ।	लघु १
करण	१	क्रियाभेदेपि करणं चपलः पारदेपि च ॥ ७६८	चपल १
पक्ष्मन्	१	पुष्पच्छदेपि पक्ष्म स्याद् भोगो वित्तेपि च क्वचित् ।	भोग १
फल	१	फलं हेतुसमुत्थेपि योगः स्याद् भेषजेपि च ॥ ७६९	योग १
पक्ष	१	पक्षोऽश्मन्तकरन्ध्रेपि वाहमाहुर्वृषेपि च ।	वाह १
आरोह	१	आरोहो हस्तिवाहेपि वशा वन्ध्यास्त्रियामपि ॥ ७७०	वशा १
क	१	कं सुखेपि विजानीयात्कक्षा स्पर्धापदेपि च ।	कक्षा १
वितान१,अन्त१		मन्देपि च वितानं स्याद् विनाशेऽप्यन्त इष्यते ॥ ७७१	
शृङ्ग	१	शृङ्गं क्रीडाम्बुयन्त्रेपि मतं लेखेपि शासनम् ।	शासन १
चूर्ण	१	चूर्णं क्षारविशेषेपि कविः काव्यकरेपि च ॥ ७७२	कवि १

वर्ण	१	वर्णो विलेपनेपि स्यात्पदं चिह्नेपि दृश्यते ।	पद	१
अरुण	१	अरुणः क्वचिदर्केपि च्छाया पङ्क्तावपि स्मृता ॥ ७७३	छाया	१
वित्त	१	वित्तं विचारितेपि स्यान्मार्गणेपि मृगः क्वचित् ।	मृग	१
सित	१	सितं प्राप्तावसानेपि भूतं प्राप्तेपि दृश्यते ॥ ७७४	भूत	१
शल्य	१	शल्यकेपि मतः शल्यो घोषः स्याद् घोषकेपि च ।	घोष	१
कृष्ण	१	मरीचेपि भवेत्कृष्णं विश्वं शुण्ठ्यामपि स्मृतम् ७७५	विश्व	१
प्रवण	१	प्रवणं दाक्षिणेपि स्यात्कूलं स्तूपेपि कथ्यते ।	कूल	१
ताल	१	तालं स्याद्धारितालेपि रक्तं कुङ्कुमकेपि च ॥ ७७६	रक्त	१
बीभत्स	१	घृणात्मकेपि बीभत्सो रसः स्वादेपि कीर्तितः ।	रस	१
सिन्धु	१	सिन्धुर्देशविशेषेपि विनीतो वाणिजेपि च ॥ ७७७	विनीत	१
अधिष्ठान	१	स्यात्प्रभावेप्यधिष्ठानं तपो धर्मेपि कीर्तितम् ।	तपस्	१
नभस् १, भूति-		वर्षास्वपि नभाः प्रोक्तो यवान्यामपि भूतिकम् ॥ ७७८	(क	१
सहस्	१	हेमन्तेपि सहाः प्रोक्तः शिशिरेपि तपाः स्मृतः ।	तपस्	१
		(खरो वेगसरेपि च ।)		
मधु	१	मधुर्मतो वसन्तेपि शुचिर्ग्रीष्मेपि दृश्यते ॥ ७७९	शुचि	१
वामी	१	अश्वायामपि वामी स्यात्कारणं करणेपि च ।	कारण	१
प्रार्थित	१	प्रार्थितं चाभियुक्तेपि भागो रूपार्धकेपि च ॥ ७८०	भाग	१

अथाव्यया निबध्यन्ते श्लोकार्धेन सविस्तरम् ।

प्रति	२	प्रति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः ॥ ७८१
अति	३	प्रशंसायां प्रकर्षे च लङ्घने च भवेदति ।
अपि	५	गर्हासमुच्चयप्रश्नशङ्कासंभावनास्वपि ॥ ७८२
हि	३	हिशब्दः स्याद्विशेषार्थे कारणार्थेवधारणे ।
अस्तु	३	ईर्ष्यायामभ्यनुज्ञाने पीडायामस्तु कथ्यते ॥ ७८३
हन्त	४	हन्त हर्षे विषादे च वाक्यारम्भानुकम्पयोः ।
बत	४	खेदानुकम्पाहर्षेषु विस्मये च स्मृतं बत ॥ ७८४

खलु ३ निषेधे वाक्यभूषायां जिज्ञासादौ मतं खलु ।
ऊरी ३ विस्तारेऽङ्गीकृतावूरी निर्दिष्टमुररी तथा ॥ ७८५ उररी २
नाम ५ प्राकाश्येऽङ्गीकृतौ कोपे नाम संभाव्यकुत्सयोः ।
अलम् ३ वारणे भूषणे शक्तौ विद्यादलमिति ध्वनिम् ॥ ७८६
पुरा ५ पुराणेऽनागतेऽतीते प्रबन्धे निकटे पुरा ।
अभितस् ५ कार्त्स्न्यशीघ्रोभयत्राग्रे समीपेष्वभितो मतम् ॥ ७८७
ननु ४ प्रश्नावधारणानुज्ञानुनयेषु स्मृतं ननु ।
इति ४ इति हेतुप्रकरणप्रकाशादिसमाप्तिषु ॥ ७८८
पुरस्तात् ४ पुरस्ताच्चतुर्षु प्राच्यां पुरार्थे प्रथमेऽग्रतः ।
यावत् ४ यावत्तावत्परिच्छेदे कार्त्स्न्ये मानेऽवधारणे ॥ ७८९ तावत् ४
अथ ५ मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ । अथो ५
च ३ अन्योन्यार्थे समाहारे च स्यादन्वाचयादिषु ॥ ७९०
सांप्रतम् २ युक्तार्थमधुनार्थं च सांप्रतं संप्रयुज्यते ।
अह २ क्षेमार्थं विनियोगार्थमहशब्दं विदुर्बुधाः ॥ ७९१
पूर्वेद्युस् २ पूर्वेद्युरिष्यते प्रातः पूर्वेद्युः पूर्ववासरे (रः) ।
अभीक्ष्ण २ पुनः पुनरभीक्ष्णं स्यादभीक्ष्णमनिशं मतम् ॥ ७९२
अन्तरेण २ अन्तरेणपदं विद्याद्विनामध्यार्थवाचकम् ।
आङ्(आ)३ आङभिव्याप्तिमर्यादाकिंचिदर्थादिषु स्मृतम् ॥ ७९३

स्वित् २ श्लोकपादैरितो वक्ष्ये स्वित्स्यात्प्रश्नवितर्कयोः ।
अमा २ अमा सहार्थान्तिकयोर्वा विकल्पोपमानयोः ॥ ७९४ वा २
स्वर् २ स्वः स्वर्गः स्वः परो लोको भेदाप्रथमयोः पुनः । पुनर् २
आरात् २ समीपदूरयोरारात्प्रभाते प्रागनन्तरे ॥ ७९५ प्राक् २
पश्चात् २ प्रतीच्यां चरमे पश्चात्साक्षात्प्रत्यक्षतुल्ययोः । साक्षात् २
एवम् ३ प्रकारोपमयोरेवमेवोपम्येऽवधारणे ॥ ७९६ एव २

ई	२	ई दुःखभावने कोपे खेदे स्यादहहाद्भुते ।	अहह २
आ	२	आशब्दः स्मरणे वाक्ये तु स्याद् भेदेवधारणे ॥ ७९७	तु २
कु	३	पापकुत्सेषदर्थे कु धिङ् निर्भर्त्सननिन्दयोः ।	धिक् २
शश्वत्	२	पुनःसदार्थयोः शश्वत्सामि निन्दार्धयोर्मतम् ॥ ७९८	सामि २
नु	२	नु स्यात्प्रश्ने वितर्कार्थे पश्चात्सादृश्ययोरनु ।	अनु २
उप	२	उप हीनेधिके दृष्टं किंशब्दः प्रश्नकुत्सयोः ॥ ७९९	किम् २
हुम्	२	हुं वितर्के परिप्रश्ने नूनं निश्चिततर्कयोः ।	नून २
समया	२	अन्तिके समया मध्ये मिथोन्योन्यं मिथो रहः ॥ ८००	मिथस् २
निस्-र्	२	निर्निश्चये निषेधे च वन्ध्ये निष्कारणे वृथा ।	वृथा २
किमुत	२	किमुतातिशये प्रश्न उत बाढविकल्पयोः ॥ ८०१	उत २
स्वस्ति	२	आशिषि स्वस्ति पुण्यादावीश्वराधिकयोरधि ।	अधि २
जोषम्	२	जोषं च तूष्णींसुखयोः कं शिरः सुखवारिषु ॥ ८०२	कम् ३
प्रादुस्	२	प्राकाश्ये संभवे प्रादुर्वार्त्तासंभाव्ययोः किल ।	किल २
हा	३	दुःखे शुचि विषादे हा तत्त्वतूर्णार्थमञ्जसा ॥ ८०३	अञ्जसा २
सकृत् २, आस्		सकृत्सहै(दै)कवारे च स्यादाः संतापकोपयोः ॥	(आः) २
तिरस्	२	तिरोन्तर्धौ तिर्यगर्थे नानानेकोभयार्थकम् ॥ ८०४	नाना २

अभिधानानि विविच्य ज्ञात्वा निखिलानि सुकविकाव्यानि ।
कृत्वा गुरुमभियोगं कोशोयं शाश्वतेन कृतः ॥ ८०५
श्रीमद्विद्याविलासस्य सभ्यैः श्रीखुडुलादिभिः ।
महाविदग्धैः कविभिर्विद्वद्भिश्च समीक्षितः ॥ ८०६
महाबलेन कविना वराहेण च धीमता ।
सह सम्यक्परामृश्य निर्मितोयं प्रयत्नतः ॥ ८०७

***

समाप्तोयमनेकार्थसमुच्चयः । कृतिरियं भट्टपुत्रशाश्वतस्य ॥

नानार्थरत्नमालाकोशः

एकाक्षरकाण्डः

दाक्षिण्यं निजसेवकेषु परमं कुर्वन्तमन्तर्मुखम्
कुन्दाच्छस्फुरदूर्जितस्तुतिकथासंछादिताशामुखम् ।
श्रीरामं रघुराजपुंगवकुलालंकारहीरांकुरं
सीतारामगुरुं च नौमि मनसा विद्वत्सभाधूर्धरम् ॥ १
विविधग्रंथसंदर्भविमर्दविमलीकृतं ।
यस्य चेतः सरस्वत्या विलासमुकुरायते ॥ २
सोयं ग्रभ्नाति नानार्थरत्नमालां गुणोज्वलाम् ।
श्रीमानिरुगदंडेशो नात्यल्पं नातिविस्तरम् ॥ ३
काण्डैश्चतुर्भिरेकाद्वित्रिचतुर्वर्णवार्णितैः ।
संकीर्णाव्ययकाण्डाभ्यामिह षड्भिरनुक्रमात् ॥ ४
कथ्यन्ते केपि नानार्थशब्दास्तन्त्रान्तरात्मना ।
अमी सलिङ्गानिर्लिङ्गभेदाद्द्वेधा भवन्ति हि ॥ ५
सलिङ्गात्सप्तधा कृत्वा स्त्रियां पुंसि नपुंसके ।
स्त्रीपुंसयोः क्लीवपुंसोः स्त्रीनपुंसकयोस्त्रिषु ॥ ६
शब्दान् पुंसः स्त्रियः क्लीबान्नामालिङ्गानालिङ्गकान् ।
प्रायः क्रमात्प्रवक्ष्यामि कान्तादीन् द्व्यक्षरादिषु ॥ ७
रूपभेदात् साहचर्यात् कण्ठोक्त्या वा विभावयेत् ।
लिङ्गान्यथादित्वं तं वा पदं पूर्वेण नान्वायि ॥ ८
त्रिष्विति त्रिषु लिङ्गेषु ज्ञेयं द्वन्द्वे द्वयोरिति ।
लिङ्गान्तरनिषेधोत्र शेषलिङ्गविधायकः ॥ ९

अ २५ अकारो ब्रह्मविष्ण्वीशकमठेष्वङ्गने रणे ।
गौरवेऽन्तःपुरे हेतौ भूषणे प्रावृड्मेद्र्योः ॥ १
सुखज्ञानमुपारातिगिरिभूमिद्रुमालिषु ।
मृगसिंहवराहर्क्षतरक्षगवयेष्वपि ॥ २
आ ४ आकारस्तु घटे भावे परितापे पितामहे ।
इ ७ इकारः फणिरत्नार्चिष्यग्रतोऽर्थजुहार्थयोः ॥ ३
हा[2]रे करेणुकक्षान्ते निशाकरकरे स्मरे ।
ई ९ ईकारोऽब्जद[3]ले लक्ष्म्यां वाण्यां कमलकेसरे ॥ ४
रचनायां शक्रचापे बाणे फणिनि कन्दरे ।
उ ९ उकारः क्षत्रिये नेत्रे हरमौलौ हरे हरौ ॥ ५
ऊ १० ऊकारः पुरुषे चन्द्रे राजपुत्रे गले शुचौ ।
प्राङ्[6]गणेऽथ मयौ पूर्णकुम्भे वाणिजि रक्षके ॥ ६
ऋ ११ ऋकारः कुञ्जरे शैले धीभेदे देवमातरि ।
भावे देवे रिपौ नद्यां सुरायां विवरे'दिवि ॥ ७
ॠ १२ ॠकारश्चिकुरे सर्पे दृष्ट्यां विगतसंपदि ।
हिमपद्मादितिस्वर्गघेर्नुभूषाम्बुजाम्बुषु ॥ ८
ऌ ८ ऌकारो दन्तिनां दन्ते कुलीरकपिदन्तयोः ।
स्वर्गादित्योर्लिप्तगात्रे गतभर्तरि रक्षसि ॥ ९
ॡ ९ ॡकारः कृकलासेन्द्रे मेरौ हिमकरे सुरे ।
लीलागतौ लोचनाश्मि नागमातरि मातरि ॥ १०
ए ९ एकारस्तेजसि जले रात्रौ हर्म्योदरे हरौ ।
व्योम्न्येकादशसंख्यायां दिनादौ मणिकुट्टिमे ॥ ११
ऐ ५ ऐकारो दिङ्मुखे हस्ते हरेऽद्रि शिखरे त्वचि ।
ओ १० ओकारः पद्मकुट्टाम्बुश्रीमदर्घेन्दुयोनिषु ॥ १२

---

१ पदे M; २ हरे M; ३ जलदे B; ४ रसनायाम् M; ५ मुरे M; ६ °गोप-मयोः M; ७ देवरे M; ८ °धनु°.

औ ५ शक्रे जवे विरिञ्चौ स्यादौकारस्त्वम्बिकासुते ।
विशुद्धाङ्गेन्दुकलयोरनन्ते सितपुष्पके ॥ १३ ॥

अं ६ अंशब्दो चक्रवाके तु दीर्घेऽञ्जलिनियोगयोः ।
• सप्तस्वरान्तमाने च परजोतिपि च स्मृतः ॥ १४ ॥

अः ११ अः शिखायां सिद्धमन्त्रे प्रग्राहेऽर्करथार्वणि ।
चक्रे कुक्कुटमूर्ध्नीन्दुबिम्बब्रह्मेशविष्णुषु ॥ १५ ॥

कः १६ को ब्रह्मात्मार्कानिलाग्निचित्तधीयमकेकिषु ।
विष्णावाहतशब्देऽब्धौ शिते तुण्डे वसौ द्युतौ ॥ १६ ॥

कम् ३, कं शिरोऽम्बुसुखे क्लीबे तत्रैव च कमव्ययम् । कम् *ind.* 3

किम् ४ किं प्रश्नाक्षेपकुत्सासु वितर्के चित्रलिङ्गकः ॥ १७ ॥

किम् किमव्ययं तु कुत्सायां विकल्पप्रश्नयोरपि । (*ind.* ३

कु *f.* १; कु कुः स्त्री भुवि कु प्रापेल्पे कुत्सायां वारणेव्ययम् ॥१८॥(*ind.*3

खः ६ खो नृप्ये गरुडे खड्गे स्वर्गे शान्तरसे कुणौ ।

खम् ११ खमिन्द्रियसुखव्योमनक्षत्रक्षेत्रपत्तने ॥ १९ ॥
कृपाफलकयोः शून्यबिन्दौ संवेशरन्ध्रयोः ।

गम १; गा३ गं गीते गा च गाथायां गो गन्धर्वगणेशयोः ॥२०॥ (गः ३
गः प्रजापतिरुद्दिष्टो गा च धेनुः सरस्वती ।

गौ *m.* ३ गौर्नाके[4] वृषभे चन्द्रे वाग्भूदिग्धेनुषु स्त्रियाम् ॥२१॥ (गौ *f.* ४

गौ *m.n.* ७ द्वयोस्तु रश्मिदृग्बाणस्वर्गवज्राम्बुलोमसु ।

घः १० मेघे निदाघे किङ्किण्यां घण्टायां घट्टने च घः ॥ २२ ॥

घम् २ घं वाद्यामृतयोर्घो[5] भूर्वार्तांघोरेपुहस्तिषु ।

घा २ घो घटीशे च घा स्त्री तु हनने धूर्ध्वनावपि(पि ?) ॥ २३ ॥

---

१ क्लीबे M.; २ सितवर्णे B. M.; ३ संदेश M; ४ कृतौ M.; मार्गे B.; ५ र्घा.

ङम् १, ङं क्लीबे मञ्जने ना तु भैरवे विषये जने । (ङः ३
चः ५ चस्तुरुष्के खरे चोरे चकारे चंद्रमस्यपि ॥ २४ ॥

चा १; चम् १ चा स्त्री शोभा शोणिते तु चं क्लीबे विमले त्रिपु । (च *m f n* १
छम् ४; छ स्यात्क्लिसाच्छादनाब्जेषु छं क्लीबे संवृतौ पुमान ॥२५॥ (*m.* १

छ *m f n.* त्रिष्वयं निर्मले नित्ये मलिने भेदके चले । (५
जः ६ जो जेव विजये मेरौ शब्दे जेतरि मत्सरे ॥ २६ ॥

जा ३ जा स्त्रिया देववाहिन्यां योनिसागरवेलयोः ।
जम् ५ जं कटीभूषणे पत्न्यां तेजस्यंबुनि जन्मनि ॥ २७ ॥

जिः ६ जिः कीर्त्यां संवरे मूर्तौ जवे व्योमपिशाचयोः ।
जूः *f.* १ जूः स्त्री वाण्यां झशब्दस्तु पुमान्घातरि हिंसके ॥२८॥ झः ७
प्रतापे भ्रमरे नष्टे चोरे झञ्झानिले मदे ।
ञः ८ ञो व्यूहविषये गर्वे लेपे[9] मूर्ध्नि खरध्वनौ ॥ २९ ॥

ञ *m f.n.* ३ त्रिपूत्तरे मूढरूपे क्लीबे तु भयपद्ययोः । (ञम् २
ञः प्राज्ञे त्रिषु ना चंद्रसूत्राधात्मनि वेधसि ॥ ३० ॥

टः ८ टः पुमान करटे धूम्रे तापेऽर्ककिरणे ध्वनौ ।
टा २ कपाटानंतयोः[10] सूतौ मूर्च्छा[11]वृत्तौ तु टा स्त्रियाम् ॥ ३१ ॥

ठः २ ठः शंकरे बृहद्ध्वाने[12] ठं क्लीबे चंद्रमण्डले । (ठम् ३
ठ *m f.n.* ३ स्तम्भने साहसे चापि त्रिपु शून्ये शठे दृढे ॥ ३२ ॥

डः ८ डः पुमान विषये शंभौ हासे त्रासे क्षये ध्वनौ ।
डा १ शंखध्वनौ रौद्ररसे क्रीडाचारस्तु डा स्त्रियाम् ॥ ३३ ॥

डम् ४ डं क्लीबे समरे[13] दुर्गापथे डमरुकेऽपि च

---

१ अञ्जने B. M.; २ स्वरे M; ३ जने M; ४ करौ M; ५ संगरे जागें जावे M; ६ कञ्झानिले B, ७ जले B; ८ उल्लाने M, ९ नाप M; १० °वर्तयोः M ११ मूर्च्छावृत्तौ M, १२ °भवौ M; १३ डमरे M.

ड *m. f. n.* २ आन्दोलने च त्रिषु तु डशब्दो गायके जडे ॥ ३४ ॥
ढः ६ ढः पिशाचे भये गाढे रागे पान्थे ध्वनौ च ना ।
ढा १; ढम् ढकायां तु स्त्रियां क्लीबे ज्ञाने तूर्यमुखेऽपि ढम् ॥३५॥ (२
ढ *m. f. n.* त्रिष्वयं निर्गुणे गूढे सौख्ये रुद्याप्यसव्ययोः । (५
णः ५ णशब्दस्तु पुमाञ्जारे भैरवे वङ्कूर्णध्वनौ ॥ ३६ ॥
णकारः कीर्तितो ज्ञाने निश्चयेपि प्रकीर्तितः ।
णा ५ णा स्त्रियां रजनीशय्याधनुर्नासाक्रियासु च ॥ ३७ ॥
णम् २; ण णं सरोजदले ज्ञाने त्रिषु निस्तुषघवस्तुनि । (*m. f. n.*
तः ६ तः शब्दः पुंसि संभोगे निश्चये कोपपुच्छयोः ॥ ३८ ॥
ता १ धातुवादविधौ चोरे करुणायां तु ता स्त्रियाम् ।
तद् *m. f. n.* ३ तच्छब्दः प्राकृतार्थोक्तौ त्रिषु हेतौ तदव्ययम् ॥ ३९ ॥
(तद् *ind.* ३
तच्छब्दः क्रीडने तु स्याज्जल्पने त्वभिधानतः ।
तृद् २; तृद् पिपासेद्योस्तु स्याथः पुंस्यूर्मिगिरिद्रुषु ॥४०॥ (थः ३
था १; थम् १ स्त्रीलिङ्गोऽथ तरंगिण्यां क्लीबे भयनिवारणे ।
थ *m. f. n.* ३ वाच्यलिङ्गस्तु धवले श्यामले पृथुलेऽपि च ।
दः २; दा २ दः पुंसि दातरि च्छेदे दा स्त्रियां क्षांतिदानयोः ॥ ४१ ॥
दम् ४ दं क्लीबे पानवैराग्यकलत्रेष्ववलोकने ।
द *m. f. n.* ४ भेद्यलिङ्गस्त्वयं मूके गृहीते द्रावके शुचौ ॥ ४२ ॥
दृक् *f.* ३ दर्शनज्ञाननेत्रेषु दृक् स्त्री दृष्टरि तु त्रिषु । (दृक् *m. f. n.* १
धः ५ धः पुंसीन्द्रध्वनौ ध्याने श्रीदे धन्वन्तरौ घटे ॥ ४३ ॥
धम् ३ धं वेश्मनि धने धान्ये बुद्धौ स्त्री धा च धिश्चधीः ।(धा, धि, धी १
धू *m.* १ धूर्ता धूर्ये स्त्री तु कम्पे वित्ते तारे युगाग्रयोः ॥४४॥ (धू *f.* ४
संपत्तौ च तथा धूः स्याद् धूश्चैव भयचिन्तयोः ।

१ कण्टके M.; २ धूपे B. M.; ३ भारे M.

नः १ ना १	हेरम्बे नः पुमान् ना स्त्री नाभौ नं ज्ञानवाच्ययोः ॥ ४५ ॥
	(नम् २
न *m.f.n.*	वध्यसूक्ष्मपरिक्लिष्टभिन्नशून्येषु[1] न त्रिषु । (५
निः २	नेता निश्च समाख्यातस्तरणश्च प्रकीर्तितः ॥ ४६ ॥
नु *f.* १;	नुशब्दस्तु स्तुतौ स्त्री स्यान्नौः स्त्री तरणिकालयोः । (नौः *f.* २
पः ५	पः पुमान्पवने चैले[2] प्राकारे कौस्तुभे रणे ।
पम् २	शुभलग्नेऽथ पं क्लीबे हेम्नि पाः पातृपानयोः ॥४७॥ (पाः २
पा *f.* ३	स्त्रीलिङ्गे त्वम्बुधारायाम् सुधायां संमतौ च पा ।
प *m.f.n.* २	पवित्रे वार्ते प्रसन्ने तु पूः स्त्री पुरशरीरयोः ॥४८॥ पूः *f.* २
पुम् १२	पूरणे चाथ पुं शब्दः पुरुषे परमात्मनि ।
	पद्मायां पारिजाते च पद्मे परिजनेऽपि च ॥ ४९ ॥
	परिबर्हे परिकरे विधिविष्णुकपर्दिषु ।
फः ५	फोऽझञ्झानिले[3] आरवोदे[4] फूत्कारे वारणे रणे ॥ ५० ॥
फा ४	फास्त्रियां निष्ठुरोक्तौ च कलाकेलिकुटीषु च ।
फ *adj* २	अथ स्फारे परोक्षे च फशब्दो वाच्यलिङ्गकः ॥ ५१ ॥
बः १३	बः कुम्भे वरुणे बुद्धौ[5] वित्ते सस्ये गुरौ मदे ।
	वक्षःस्थले च बः प्रोक्तो गदायां च प्रकीर्तितः ॥ ५२ ॥
	विभूतिकारे कलहे पाक्षिगर्भे च पर्वणि ।
बा ३; ब	बा स्त्रियां कार्कली[6]वल्लीशृङ्खलस्वमले त्रिषु ॥५३॥ *m.f.n* ३
भः ५	भः शंभौ भ्रमरे भावे शुक्लेभे[7] जलदे पुमान् ।
भा *f.* ३	भा भुव्यलंकृतौ दीप्तौ स्त्रियां भाः किरणे द्युतौ ॥५४॥(भाः २
भम् ५	क्लीबे तु गगने राशौ तारायां पुण्ड्रचक्रयोः ।

१ ०श्लिष्टशून्यभेदेषु M.; २ शैले प्रकाशे कौस्तुभे क्षणे M. B., ३ कंकानिल B., ४ आस्फोटे M., ५ विन्दौ विकल्पे च M , ६ काहली B. M., ७ शुक्रेशौ M.

भी *f.* १ भी स्त्री भीत्यां खगे पुंसि स्थानभूम्योस्तु भूः स्त्रियाम् ।५५।
(भी *m* १; भू *f.* २

मः ५ मः शंभौ धातरीन्द्रे च मासे च माः पुमान् । (माः *m.* २

मा *f.* ११ मा स्त्री माने मृतौ वेलामेधाश्रीमद्यमातृषु ॥ ५६ ॥

मा *ind.* १ माव्ययं प्रातिषेधे च जले तु स्यान्नपुंरुकम् । (मम् १

मः शिरो मा च मेध्ये स्यान्मा लक्ष्मीश्च प्रकीर्तिता ॥५७॥

प्रमातरि च माने मा बन्धने मः प्रकीर्तितः ।

मुः *m.* ३ मुः पुंसि बन्धने पिङ्गकपिलाभिधवर्णयोः ॥ ५८ ॥

यः ६ यस्त्यागे निलये वायौ यमे धातरि मातरि ।

या ११ या स्त्रियां यानमर्ज्जयोः शोभा लक्ष्म्योस्तु निर्वृतौ[3] ॥ ५९ ॥

यद् *m f.n.* यच्छब्दः सर्वनामाख्यस्त्रिषु हेतौ यदव्ययम् । (१
यद् *ind.* १

या स्त्री ख्यातौ प्रकथने ज्यामौर्वीमातृभूमिषु ॥ ६० ॥

यु *m.* ३ युर्ना दिव्याह्वि वह्नौ च रवे व्योम्नि द्यौ दिवौ स्त्रियाम् ।

रः ११ रः पुमान्पावके कामे क्षये[2] वज्रे शवे धृतौ[1] ॥ ६१ ॥

धने राजभये शब्दे रामायामानिलेऽपि रः ।

राः *f.* ५ राः स्त्रियां हेम्नि शालायामाशंसायां गतावपि ॥ ६२ ॥

रम् ८ रं क्लीबे रुधिरे मूर्ध्नि ध्यानव्योमोडुकुक्षिषु ।

र *m.f.n.* वक्त्रे भये च त्रिषु तु विरसे त्यागतीक्ष्णयोः ॥६३॥ (३

रा *m.n* २ रास्तु द्वयोर्ध्वनौ स्वर्णे रिशब्दस्तु स्रवे क्षये । (रि *m.* २

रुग् *f.* ३ स्त्री रुग्जलेच्छयोः कान्तौ रुङ्ना युद्धे भये ध्वनौ ॥ ६४ ॥
(रुग् *m.* ३

रुः *f.* १८ स्त्री कामिनीवापिकयोः रुस्वर्णे कामरूपिणि ।

---

१ निर्मितौ M.; २ क्षयवज्रशयेष्वृतौ M.; ३ घने M. B.

श्रीर्वेशरचनाशोभा संपत्सरलशारिषु ॥ ६५ ॥

रु *m. f n.* वाणीलक्ष्मीलवङ्गेषु विषे बिल्वेऽप्यथ त्रिषु । (२

जटायां पूरणे स्त्री श्रीः स्रग्व्योमाङ्ग गतौ स्त्रियाम् ॥ ६६ ॥

लः ६, ल *m f. n* १ लः खण्डने निम्बदाने स्त्री नेत्रे लवने तु लम् । ला १ लम् २

लो दीप्तौ ह्लादने भीत्यां वायौ भूमावपि स्मृतः ॥ ६७ ॥

लीः २ तैले नपुंसके लं च लीः श्लेषे च भयेऽपि च ।

वः ५ वः पुमान्सान्त्वने वायौ संयमे वरुणे स्मरे ॥ ६८ ॥

विः १५ विश्चक्षुषि व्योम्नि वायौ परमात्मनि पक्षिणि ।

ज्ञानवैराग्यसंबन्धपशुपक्षिमृगादिषु ॥ ६९ ॥

ताडिज्जलदखद्योतशक्रचापेषु विः स्मृतः ।

विट् *m.* १ वैश्ये जने पुरीषे विट् क्रमात्पुंसि द्वयोः स्त्रियाम् ॥ ७० ॥ (विट् *f.* २

शः ६ शो वल्मीके शिवे कूर्मे भूपे शिष्ये दन्तकृतौ ।

शा ४ शा स्त्रियां देवपूजायां शक्तौ शोभा वरेण्ययोः ॥ ७१ ॥

शम् ८ रमायां शं सुखे क्लीबे शास्त्रे श्रेयसि मण्डले ।

शम् *m. f. n.* कीर्तौ शक्रायुधे स्वर्गे परोक्षे तु त्रिलिङ्गकः ॥ ७२ ॥ (१

शम् *ind.* १ शमव्ययं च सौख्यार्थे शिः शङ्कौ शिवशान्तयोः । (शिः ३

शीः ३; शीर्बाणहिंसास्वापेषु षः स्वर्गे विषये च ना ॥७३॥ (षः २

षा १; षा स्त्री रमायां षं क्लीबं गर्भे मोक्षावसानयोः । (षम् ३

ष *m. f. n* ३ मर्षणे च त्रिलिङ्गस्तु परोक्षश्रेष्ठयोरयम् ॥ ७४ ॥

सः २ सः पुंस्युमासुते वायौ देहकांतौ तु सा स्त्रियाम् । (सा १

सम् ४ सं क्लीबे स्यन्दनपथे ध्याने ज्ञाने निवारणे ॥ ७५ ॥

---

१ सात्त्विके M २ मङ्गले M.; ३ सर्गे M.;

सत् *m. f.* सत्सत्ये विदुषि श्रेष्ठे साधौ भवति च त्रिपु । (*n.* ४

सत् *n.* १ सत् क्लीबमृक्षे सूशब्दः प्रेरणे गर्भमोचने ॥७६॥ (सू २

से *f.* १ से सेशब्दः सेवने स्त्री स्यात्सेवके त्वभिधेयवत् । (*m. f. n.* १

स्व *m. n.* १; स्वोऽस्त्री धने पुमाञ्ज्ञातौ त्रिष्वात्मीये स्वमात्मनि ॥७७॥
(स्व *m.* १, स्व *m. f. n.* १, स्वम् १

स्वर् *ind* १ स्वरव्ययं च त्रिदिवं त्विट्कान्तिज्वालयोः स्त्रियाम् ।
(स्वर् *f.* १०

वल्के लवंगवल्के त्वक् वाग्द्वारोपमयोः स्त्रियाम् ॥ ७८ ॥

हः ९ हः शंकरे हरौ हंसे रणरोमाश्ववाजिपु ।

हा २ गर्वे प्रचेतासि स्त्री तु हा त्यागे गतिशीतयोः ॥ ७९ ॥

हम् ३ हं क्लीबमस्त्रमुखयोः क्वणिते मणिरोचिषि ।

ह *m. f. n.* २ परब्रह्मामन्त्रणयोस्त्रिषु मन्मथहासयोः ॥ ८० ॥

क्षः ४ क्षः संरोधे विरोधे च क्षेमदुःस्वप्नयोश्च ना ।

क्षा २; क्षा स्त्री क्षमायां निद्रायां क्षं क्लीबे क्षेत्ररक्षसोः ॥८१॥क्षम् २

—०—

अप्राचुर्यात्प्रयोगस्य लिङ्गं क्वचिदुपेक्षितम्

एकाक्षरेषु शब्देषु तदूह्यं लक्ष्यवेदिभिः ॥ ८२ ॥

इति जगदुपकारिण्यामिरुगदण्डाधिनाथरचितायाम् ।

एकाक्षरपदकांडः संपूर्णो नानार्थरत्नमालायाम् ॥ ८३ ॥

॥ इति शुभम् ॥

१ °वीणयोः M.; २ °सुखयोः M.; ३ सुलालहासयोः M.

NOTES

Verse.

1-शिवा *f.* = क्रोष्टृ *m.* ' a jackal. '

26-For अक्ष meaning ' an organ of sense ' see Amara. iii. 3, 222-223.

28-कृष्ण *n.* = शस्त्रक ' iron. '

30-The second line here is an exact copy af Amara. iii. 3. 178.

44-The reading भगः श्रुतिः in Prof. Zachariae's edition is incorrect.

51-Here काल equivalent to त्रिंशत्काष्ठाः.

58-The word जनितृ means ' parents ' in general, not ' father ' in particular as given in Verse 763. *cf.* Amara. ii. 7, 58.

66-सूत्रम् = हस्तसूत्रम् चमूकटिः = सेनापश्चाद्भागः.

67-See Kshira. on Amara. iii. 3. 120.

79-पणस्त्री = पण्यस्त्री ' a harlot. '

76-तद्गुणाः = शब्दादयः. *cf.* Amara. iii. 3. 65.

82-ग्रन्थावृत्ति means ' frequent recitation of a text. '

85-दापनम् = अर्थदापनम्. *cf.* Amara. iii. 3. 119.

91-उपनिर्गमः = निर्गमनमार्गः ' exit '; or उपनिर्गमः = पुरः समीपे विश्रामभूरुपनिष्कराख्या. See Kshira. on Amara. iii. 3. 55.

98-This verse is based upon the Vârttika ' पुरुषाद्वधविकारसमूहतेनकृतेषु ' on Pâṇini Sûtra V. 1. 10.

102-For कुतपः = कालप्रभेदः see Kshira. on Amara ii. 7. 31.

105-वैयावृत्त्यकरः means ' a debauchee ' from व्यावृत्ति = Debauchery. This reading is preferable to वैयापृत्यकरः=व्यावहारिकः.

118-उपसूर्यकमण्डलम् = समीपे सूर्यस्य प्रतिकृतिः ' a halo round the sun.' See Kshira. on Amara. i. 2. 33.

121-धनं चोपचयांशे वैपुल्यं यस्य, etc. = अंतव्ययविशुद्धं धनम् i. e ' capital

not subject to increase or decrease.' See Kshîra. on Amara. iii. 3. 213.

140–पाश means प्रशस्त or शोभन in compounds like कर्णपाश, श्रोत्रपाश, etc.

148–See Kshîra. on Amara. iii. 3. 147–148.

175–प्रहरणम् = कासूर्नामायुधं सर्वलाख्यम्. See Kshîra. on Amara. iii. 3. 66.

180–वीणाप्रसेवः = The lower and bigger part of a Vinâ.

182–अकुप्यकम् = सुवर्णरजतादि धनम् 'gold or silver.'

191–लोकधातुः = जम्बुद्वीपः–तस्यांशो भूखण्डः (वर्षम्), यथा भारतं वर्षम्. See Kshîra. on Amara. iii. 3. 225.

203-ललाटे = ललाटास्थि. See Amara. iii. 3. 18.

215–आशितंभवः–See Pânini Sûtra. III. 2 45.

217–The reading ग्रामणीर्वाक्ति नापितम् seems to be incorrect.

227–Here the homonym is मदकल and not मत्त as misunderstood by Prof Zachariæ.

247–Here Prof. Zachariæ takes अक्षय as qualifying काञ्चन, but यदक्षयं तत् what is '*akshaya*' i. e. स्वर्ग is one of the senses of कल्याण. *cf.* Verses 276, 350, 499, etc. for similar construction.

260–उद्रङ्ग means 'what appertains to or rises from anything.' उद्रङ्गः=द्रव्यभेदः according to Mahendra. The word सोद्रङ्ग occurs very often in inscriptions, and means 'together with the produce of the land granted.'

265–The word वलज (*f.* °जा) is an adjective meaning 'beautiful.' *S*âsvata follows Amarasimha and gives वलजा = चारुस्त्री. See Amara. iii. 3. 31.

266–कल्यपाल means 'a distiller.' See कल्या in Verse 24.

272–पर्यस्तिका = प्रगाढगात्रिकाबन्धः (आसनविशेषः).

275–विशेषः = प्रकारः. *cf.* Amara iii. 3. 63.

276–The reading of Prof. Zachariae is inconsistent with Amara. ii. 10. 3. See क्षत्तृ in 316; *cf.* वैदेहक in 346.

281–दैत्यः = बलिसुतः, बाणासुरः See Amara iii. 3. 45.

296–संक्षेपे = क्षिप्रे, यथा-पुलाककारी विपुलाशयः स्यात्

287–गिरेरङ्गे=गिरेर्मध्यभागे. See Amara iii. 3. 5.

308–वृक्षः = द्रुमप्रभेदः. जनपदान्तरे = देशभेदे.

315–the reading of Prof. Zachariæ is opposed to Amara, iii. 3. 209.

316–The first sense of क्षत्तृ is confounded with that of सूत in Verse 276.

319–वणिज् is fem. in the first sense and mascu. in the other.

327–अक्षः = पाशकः 'a die', दुन्दुभि being mascu. in the first sense and fem. in the others. See Amara. iii. 3. 135.

348–शैलनितम्बः = The flank of a mountain.

349–कालः = षट्क्षणः कालः. See Amara. iii. 3 43.

355–आरकूटम् = पित्तलाख्यम् 'brass.'

365–*cf.* कोलिकाफलम् in Verse 361.

370–गजालिकम् = The temples of an elephant.

377–खलिना = कविका 'The bit of a bridle.'

380–वासयोगाः—वास्यते सुगन्धीक्रियते यैर्युज्यमानैर्मिश्रैस्ते वासयोगाः. See Kshîra. on Amara. ii. 7. 134.

388–There is no lacuna here as shown by Prof. Zachariæ.

395–प्रभावः = Heroism.

402–उल्लोचः =कदर्कः, चन्द्रकाख्यः 'an awning'.

410–The reading असंमतौ seems to be incorrect. See Kshîra on Amara iii, 1, 111.

430–समाधिस्थः = ध्यानस्थः See Kshîra. on Amara. p. 200.

445–For the second sense of उपाधि see Amara. iii. 1. 11-12

460–उद्देशपादपः—This word is explained by different commentators thus–(1) प्रसिद्धिहेतुर्वृक्षः, (2) देवकुले महावृक्षोऽध्वगाश्रयः, (3) रथ्यावृक्षः, (4) चतुष्पथस्थवृक्षः.

476–स्ववासिनी = सुवासिनी. See Kshîra. on Amara. ii 6. 9.

479–The reading विप्रलंभकः seems to be incorrect.

508–दुर्नामक—A disease (piles)

514-सर or स्फर means 'water.'

515-पिच्छित—Pounded, from पिच्छ् कुट्टने.

559-जलरङ्कुः = दात्यूहः, जलरङ्कः.

567-कलना = परिसंख्यानम् 'reckoning.'

568-वर्धापक means a vessel filled with valuable things distributed amongst servants, etc.

576-The reading अग्निमन्थाख्यम् gives no sense.

581-गिरियक = गैरिक 'red chalk.' गीर्णिः = 'swallowing.'

590-उपायिन् means 'resourceful.'

606-षिड्गः = वेश्यापतिः 'a libertine.'

610-उत्कोचः = उपदा 'bribe.' See Kshîra on Amara. Page 126.

612-वार्त्तिक (derived from वार्त्त) means 'a physician.' The word नरेन्द्र is used in the sense of विषवैद्य in Bâna's Kâdambarî and Sis. ii. 88.

615-पार्ष्णिगा = कुंभिका 'moss.'

616-प्रतिक्रयः = मूल्यम् 'price or value.' पुद्गलः = शरीरमात्रम्, देहः 'the body.'

633-कार or यात = Restraint.

635-किरः = वराहः 'a boat or a hog.'

643-जायु means 'a medicine' (जयति रोगाञ्जायुः).

663-वृन्तम् = पुष्पादिबन्धनम् 'a stem.'

668-The manuscript here is very corrupt. नवे (?) may possibly be for नाके 'the sky'

678-ग्रामक means 'a small-village.'

686-व्युत्पन्न—Skilled or skilful.

716-दिति means 'cutting' *cf.* Verse 741.

722-स्तम्भः = गृहस्य स्तम्भः. *cf.* गृहस्थूणम् in Amara, iii. 5. 30.

728-ग्रन्थगुम्फः = ग्रन्थगुम्फनम् 'composition of a literary work.'

751-भोगिक means 'the headman of a village.'

758-दुर्दुरूट means a miscreant, an unbeliever.

776-स्तूपः = मृदादिकूटः 'a mound of earth.'

779-वेगसरः = गर्दभः 'A donkey.'

790-अन्वाचयः—मुख्यसिद्धावप्रधाननिष्पत्तिः is one of the senses of च. See Kshîra. on Amara iii. 3. 242.

1 कमठ *m.* \ tortoise; a water-jar; bamboo.
अङ्गन *n.* Courtyard.
मेढ् *m.* A ram.
2 गवय *m.* A kind of ox.
6 गल *m.* neck.
6 मयु *m.* A kinnara; an antelope
8 चिकुर *m.* Hair on the head
8 भूषा *f.* An ornament.
9 कुलीर *m.* कुलीरकः A crab.
10 कृकलास *m.* A lizard (सरडा)
19 कुणि *m.* A cripple with a withered or crooked main; a whitlow.
20 फलक *n.* Board; plank.
22 किङ्किणी *f.*Small bell; tinkling ornament.
24 तुरुष्क *m.* The Turks (always in the plural)
25 लिप्सा *f.* इच्छा desire.
31 करट *m.* An elephant's cheek; an unbeliever; a musical instrument.
35 ढक्का *f.* A double drum.
तूर्यमुख *n* the face of a kind of musical instrument; (तूर्य possibly तुतारी)
38 निस्तुषवस्तु *n.* A purified thing. निस्तुष-purified; तुष husk.
40 ईहा *f.* स्पृहा Desire,
43 द्रावक *m.* A loadstone the moon-stone (चंद्रकान्तः); a thief.
48 प्राकार *m.* Rampart.
51 पारिबर्ह *m* A wedding present.
52 कुटी *f.* A curve, cottage.
52 स्फार *m.* swelling; palpitation. स्फार *n.* abundance.
54 काकली *f.* A low sweet tone; a musical instrument with a low sweet tune; a Gunja plant.
56 पुण्ड्र *m.* A sugarcane (red kind), a lotus, a white lotus.
58 मेध्य*m.*a goat; the Khadira tree
65 स्वर्ण *n.*Gold, golden coin.
66 कामरूपिन् adj. A person taking any form at will at any time; beautiful.
74 स्वाप *m.* Sleep, a dream.
75 मर्षण *n.* Forbearance patience.

INDEX (i) (शाश्वतकोशः)

(Figures that precede the words indicate the number of senses and figures that follow indicate the verse)

INDEX to नानार्थरत्नमाला.

(Figures that follow the word indicate the Verse.)

3